*Srirangam Sri Sankaragurukula Series No. 14.*

# MAHISHA SATAKAM

OF

SRI VANCHESVARAKAVI

*with the commentary 'Slesharthachandrika'*

OF

his great-grandson SRI VANCHESVARA YAJVA

*with a Sanskrit Prastavana*

By K. S. VENKATARAMA SASTRI

AND

AN ENGLISH INTRODUCTION

BY

R. KRISHNASWAMI IYER M.A., B.L.

*Advocate, Tinnevelly*

EDITED BY

*Gurubhaktasikhamani, Sastraprasarabhushana*

T. K. BALASUBRAHMANYA AIYAR, B. A.

*Dharmadhikari, Sri Sankaragurukulam, Srirangam.*

SRI SANKARAGURUKULAM,
SRIRANGAM.

Price Rs. 1-8-0 ] [ Postage Extra.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## SRIRANGAM SRI SANKARA GURUKULA SERIES.

| | | Rs. | As. | Ps. |
|---|---|---|---|---|
| No. 1. | पञ्चरत्नकारिका: A poetic commentary on the Upadesa Panchakam of Sri Sankara Bhagavatpadacharya by Sri Sadasiva; with a *Prastavana* by Sri Sacchidananda Tirtha Swamigal. | 0 | 12 | 0 |
| No. 2. | नयमञ्जरी A poetic commentary on the Brahma Sutras, by Sri Appayya Dikshita. With a Sanskrit Introduction by Sri Sacchidananda Tirtha Swamigal. | 2 | 0 | 0 |
| No. 4. | बालभारतम् of Agastya Pandita with the Commentary *Manohara* of Salva Timmaya Dandanatha. Part I. Cantos 1-3 | 2 | 0 | 0 |
| No. 5. | कुमारसंभवचम्पूः by Sri Sarabhoji Maharaja of Tanjore; with an Introduction by Vidyasagara Vidyavacaspti P. P. Subrahmanya Sastri. B. A. (Oxon), M. A., Professor of Sanskrit, Presidency College, Madras. | 1 | 0 | 0 |
| No. 6. | डमरुकम् A Sanskrit Farce by Pandit Ghanasyama with the Commentary of Chandrasekhara; Edited by Do. | 0 | 8 | 0 |
| No. 7. | शृङ्गारप्रकाशः by Maharajadhiraja Sri Bhoja Deva. Part I, Prakasas 1 & 2 Edited by Do. | 1 | 8 | 0 |
| No. 8. | मनीषापञ्चकम् of Sri Sankara Bhagavatpadacharya with a Summary of the Commentary of Sri Sadasiva Brahmendra and a Foreword by Rao Saheb N. Natesa Iyer B.A., B.L., President, All-India Varnasrama Swarajya Sangha, Madura. Edited by Gurubhaktasikhamani T. K. Balasubrahmanya Iyer. | 0 | 6 | 0 |
| No. 9. | स्तोत्ररत्नमाला Part I. Contains rare stotras by different ancient authors | 1 | 8 | 0 |
| No. 10. | जीवन्मुक्तिकल्याणनाटकम् by Nalla Dikshitar. | 1 | 4 | 0 |
| No. 14. | महिषशतकम् of Sri Vanchesvarakavi with the commentary of his great-grandson Sri Vanchesvara. | 1 | 8 | 0 |
| Mo. 15. | शिवकेशादिपादान्तस्तुतिः of Sri Sankarawith the rare commnetary of Sri Ramakrishna Suri. | 0 | 12 | 0 |

### IN THE PRESS.

No. 3. शास्त्रदीपिका of Parthasarathi Misra with the commentary *Mayukhavali* of Sri Appayya Dikshita.

No. 11. मद्रकन्यापरिणयचम्पूः by Gangadhara Kavi.

No. 12. तत्त्वकौस्तुभः by Bhattoji Dikshita.

No. 13. सौन्दर्यलहरी with the commentaries of लक्ष्मीधरा, सौभाग्यवर्धनी and अरुणामोदिनी

The above Six books are being published serially in the *Sri Sankaragurukula Patrika*; Annual Subscription Rs. 6 only.

*Apply to* THE LIBRARIAN, *Sri Sankaragurukulam, Srirangam.*

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

*Srirangam Sri Sankaragurukula Series No. 14.*

# MAHISHA SATAKAM

OF

SRI VANCHESVARAKAVI

*with the commentary 'Slesharthachandrika'*

OF

his great-grandson SRI VANCHESVARA YAJVA

*with a Sanskrit Prastavana*

By K. S. VENKATARAMA SASTRI

AND

AN ENGLISH INTRODUCTION

BY

R. KRISHNASWAMI IYER M.A., B.L.

*Advocate, Tinnevelly*

EDITED BY

*Gurubhaktasikhamani, Sastraprasarabhushana*

T. K. BALASUBRAHMANYA AIYAR, B. A.

*Dharmadhikari, Sri Sankaragurukulam, Srirangam.*

SRI SANKARAGURUKULAM,
SRIRANGAM.

Price Rs. 1-8-0 ] [ Postage Extra.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# PREFACE

MY first acquaintance with the exquisite poem of Mahisha Satakam was some decades ago when the late revered Kunigal Rama Sastrigal, Dharmadhikari of the Mysore Palace, recited some stanzas from it when we were journeying together in a car and some buffaloes blocked the way. The simplicity of the style, the fine humour, the facility of expression and the magnificent use of double meaning words without the slight trace of strain or artificiality made a very great impression upon me and, when I desired to have a copy of the entire poem, he told me that it had not been printed but the Mysore Pandits were very familiar with the stanzas as its commentator was once a Pandit of the Palace and was a very popular figure respected and loved by all. It gives me very great pleasure to find that a copy of the poem and of the commentary thereon has been obtained from a direct descendent of both the author and the commentator and that he has been kind enough to furnish such information as is available to him about them. Brahmasri Venkatarama Sastrigal has with his characteristic flow and clearness given in his Sanskrit Introduction a succinct account and I cannot do better than summarise it in English.

King Sahaji who ruled Tanjore from 1684 to 1710 A. D. was a great patron of learning and was himself a very learned scholar and poet. It was he that founded the village of Sahajirajapura also known as Tiruvisanallur in the Tanjore District and granted it to several eminent scholars one of whom was the father of our author. He seems to have held a responsible post as a minister of the king. When the king went to Madura and stood in the presence of Goddess Minakshi he sang forth this extempore verse

पुरि मधुरं गिरि मधुरं गरिमधुरंधरानितम्बभाराढ्यम् ।
स्थूलकुचं नीलकचं भालकचन्द्राङ्कितं तेजः ॥

Our poet who was then quite a young boy and had accompanied his father in the royal camp was struck with the rare poetical skill of the king and immediately said

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हृदि तरसा विदितरसा तदितरसाहित्यवाङ्न मे लगति ।
कविलोके न विलोके भुवि लोकेशस्य शाहजेरुपमाम् ॥

The king at once recognised the greatness of the boy and with great affection called him Kutti Kavi (young poet). This name stuck to him eclipsing his real name of Vanchesvara.

After the passing away of King Sahaji, his son Pratapa Simha ascended the throne and, taking advantage of his youth, several undesirables got influence over him with the result that the sincere well-wishers of the state were not listened to and scholars like Sridhara Venkatesa and Amba Deekshita were neglected and our poet who held the post of his father thought it wise to remove himself from the royal court. His attempts to catch the ears of the young king were all futile when he hit upon the plan of this poem wherein he has in his inimitable language extolled the virtues of the buffalo and of agriculture so closely connected with it in comparison with the service under a king surrounded by ministers and officers who had scant regard for honesty or learning. When this poem ultimately came to the notice of the king, he repented for his follies, came to the residence of the poet and persuaded him to return to the royal court. Besides this centum on the Buffalo, he has written two others— the Dhuti Satakam and the Asirvada Satakam. The latter has already been published by the Sri Vani Vilas Press and we hope the former also will find its way into print before long.

The Buffalo is decidedly a very unattractive animal and is more so by its being associated with Yama the God of Death as his vehicle. But to our poet it is so sacred and inspiring that, when he thinks of it, thoughts and expressions well up in his brain in such superabundance that he has got to pick and choose, thereby denying to most of them the opportunity of sharing in the glory of describing this wonderful specimen of God's creation.

माहात्म्यं तव वर्णये कियदिति स्तुत्युक्तिवर्त्मातिगं
त्वत्कल्याणगुणानुरूपमधिकप्रीत्या ममात्मादरात् ।
अर्थाः शब्दचयाः सदाऽहमहमित्यग्रे स्फुरन्त्यद्भुताः
स्वीकुर्यां कमिव त्यजामि कमिव श्रीमँल्लुलायप्रभो ॥ ४२ ॥

In fact the author has by the very fine handling of slesha equated the buffalo with every imaginable thing. Even the Acharyas, the Avataras, the Devas and even the unqualified Absolute have to submit to such an equation at the hands of this poet and it is no surprise therefore that he has been appropriately crowned Slesha Sarvabhouma I desist from translating any samples of his style for no

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

translation can ever adequately convey the beauty and richness of the original and this is more so when the entire poem is founded upon an exquisite use of Slesha.

The commentator Kutti Suri or Vanchesvara is a namesake and a great grandson of the author and has faithfully recorded in his commentary the interpretation and explanations which he had handed down to him from his own father. The commentary is very lucid, learned and to the point and but for it the hasty reader may lose sight of many a point of beauty in the original. He was himself a very eminent scholar and had his early education at the feet of Isvara Sastri of Tiruvisanallur itself and later on of Srinivasarya of Manalur close by. From the latter he learnt the intricacies of the modern school of Nyaya and mastered the Tatvachintamani of Gadadhara just then coming into prominence. He easily worsted many a combatant in the field of logic by handling this new weapon Chintamani and Amara Simha a Mahratta chief who appreciated him gave him the appellation of Chintamani Kutti or more shortly Mani Kutti. In acknowledgement of this honour, he has written four books known as Datta Chintamani, Sraddha Chintamani, Brahmasutrartha Chintamani and Bhatta Chintamani.

King Sarabhoji II of Tanjore started a Veda Sastra Pathasala at Orattanadu village and appointed Kutti Suri as one of the staff. But after a short time he felt the royal service somewhat irksome and decided upon a pilgrimage to Northern India. Before starting, he poured out his heart to the Goddess Dharmavardhini at Tiruvadi in beautiful stanzas of which the only remnant now available is the line

कर्तीन्द्रयामः कति चन्द्रयामखण्डं पुनः पूरयितुं पिचण्डम् ॥

He went to Mysore and was detained there by Haidar Ali who had great respect for him. After Haidar's death, Tippu Sultan also held him in high reverence but one day he asked the Pandit in a very light manner when it would please him to become a Muslim. This made him decide to leave the state and he started for Benares and on the way went to Poona then ruled over by Bhaji Rao Peshva. The Court Pandit Chanda Narayana Bhattacharya had a contempt for southerners as they were not uptodate in the new school of Nyaya and declined to grant an interview to Kutti Suri. The latter however persisted and the court Pandit thought it proper to remain in a reclining posture when Kutti Sastri was admitted to his presence. But after a few minutes conversation he realised the great learning of the visitor and made friends with him so much so that Kutti Sastri himself was soon after enrolled as a Pandit of the Peshva's Court. At the request of the Peshva he wrote commentaries on the Hiranyakesi Srauta and Samanya Sutras. After staying there for some time he went to Benares. While there he had the rare fortune of studying Vedanta

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

under Ahobala Pandita and of himself teaching the same to the numerous deserving students who flocked to him.

It is interesting to recall that among such students was the young man who was later on to become the Jagadguru of Sri Sringeri Mutt under the name of Sri Nrisimha Bharati and the worthy predecessor of the illustrious Sri Sacchidananda Sivabhinava Nrisimha Bharati Swamigal. While at Benares Kutti Sastri wrote many a book. Probably Kakataliya Vadartha, Dhurganachandrika and Tarkasangraha Vyakhya are among those then written. After some time he started for a return to the South. While passing through Maharashtra on the way back, he was honoured by Madhava Rao, Parasuram Pattavardhana and other famous Pandits of the time. By the time he came to Mysore, the Hindu dynasty had been restored and Krishnaraja Wodayar was the ruling Prince. The king persuaded him to stay for some years at Mysore and appointed him as a Dharmadhikari in his own palace. Thanks to this royal patronage the Pandit performed the Jyotishtoma Yaga in a very grand style. While at Mysore he heard about the greatness of the then Jagadguru at Sringeri and went there to pay his respects to him. He did not recognise in the Acharya before him the young Brahmachari who was his disciple at Benares but the latter could not fail to recognise his Vedanta Guru, When the recognition was complete on both sides, their joy at so unexpectedly meeting each other was necessarily boundless.

The Pandit returned to Mysore and thence proceeded to Ramesvaram. On the way he saw King Sarabhoji at Tanjore and the king was extremely glad to see the Pandit whom he thought he had lost for ever by his own fault. After his return from Ramesvaram he stayed in his own village. Ripe in years and in learning, he had intense devotion to God, especially as manifested in the Mahalinga Murti at Madhyarjuna near his village and he has written a Mahalinga Sataka in praise of Him. He seems to have lived to the age of about eighty and then merged in the feet of his favorite Deity Sri Mahalinga.

The reader will recognise from the above that the Mahisha Sataka is not an idle Kavya written by a clever poet for the benefit of those who want to waste time pleasantly but that it is replete with eternal truths, is from the pen of a really very serious author and has been commented upon by no less than the Vedanta Guru of a Sringeri Acharya. We have much pleasure and pride therefore in launching this publication for the benefit of all lovers of Sanskrit and of wisdom.

26-11-46. R. KRISHNASWAMI AIYAR.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं महिषं सर्वदेवात्मकत्वेन सर्वोत्कृष्टवस्तुत्वेन, राज्ञोऽधिकतरत्वेन स्तुत्वा तन्मुखेन सर्वाद्वैतं प्रबन्धपरमतात्पर्यविषयीभूतं निरूप्य स्वोपजीव्यराजवंशस्याशिषं पुनः प्रार्थयते— श्रीमदिति। श्रीमान् लक्ष्मीसंपन्नः भोसलवंश एव दुग्धजलधिः क्षीराब्धिः तस्य, संपूर्णचन्द्रोपमो राकाचन्द्रसदृशः यः प्रतापः प्रतापसिंहाख्यः मूर्तो मूर्तिमान् स्वयं क्षितिपतिः भूपतिः सन् क्षितिं भूमिमक्षति निरुपद्रवं यथा तथा शास्ति रक्षति। सः प्रतापसिंहाख्यो राजा दीर्घायुः चिरजीवी आत्मजयुतः पुत्रपौत्रादिसंतानवान् धर्मी धर्मप्रवणचित्तः प्रजासु स्वविषयवासिनीषु रागवान्, लोभवान निस्तुलैः निरुपमैः निजसभास्तारैः स्वीयसभ्यश्रेष्ठैः क्रमात् पुत्रपौत्रादिक्रमात् आगतैः प्राप्तैः सह श्लाघोऽस्तु अरोगदृढगात्रो भवतु। अत्र भोसलवंशस्य दुग्धजलधित्वोक्त्या रूपकालंकारः स्पष्टः। तेन च राजवंशस्य सर्वजनप्रेमास्पदत्वं निर्मलत्वं कीर्तिमत्त्वं च व्यज्यते। राज्ञः पूर्णचन्द्रसाम्योक्त्या सकलजनानन्दकरत्वं व्यज्यते। एवं पूर्णचन्द्रसंपर्काद्यथा क्षीराब्धिर्वर्धते, एवं राजानमासाद्य भोसलीयान्ववायस्य संतानवृद्धिर्व्यज्यते ॥ १०१ ॥

राजा धर्मपरः परस्परधृतस्नेहाश्च तन्मन्त्रिणो
राजन्वत्यवनी वनीपकजना आढ्या भवन्तु क्षितौ।
पुष्टाङ्गाः पशवश्चरन्तु भजतां दुर्भिक्षवार्ता लयं
वाञ्छानाथकवेः कृतिश्च कुरुतां निर्मत्सराणां मुदम् ॥ १०२ ॥

इति श्रीवाञ्छेश्वरकविविरचितं महिषशतकं संपूर्णम् ॥

---

उपक्रमप्रतिपादितमर्थमुपसंहरन्प्रबन्धावान्तरतात्पर्यविषयीभूतं राजतदमात्यादीनां सन्मार्गप्रवर्तनरूपं, सर्वेषां जनानां गवां स्वप्रतिपादितमहिषवंशस्य च मङ्गलरूपमर्थमुपसंहरति— राजेति। शेषं सुगमम् ॥ १०२ ॥

क्षेत्राणामुत्तमानामपि यदुपमया काऽपि लोके प्रशस्ति-
श्चित्तद्रव्येण मुक्तिक्रयमभिलषतां याऽद्भुता पण्यवीथी।
साक्षाद्विश्वेश्वरस्य त्रिभुवनमहिता या पुरी राजधानी
रम्या काशी सकाशाभवतु हितकरी भुक्तये मुक्तये नः ॥

प्रीयतां कुट्टिकृतिना निर्मितेयं सुधीमुदे। भूयाद्वाञ्छेश्वरग्रन्थव्याख्या श्लेषार्थचन्द्रिका ॥

इति श्रीकुट्टिसूरिकृतमहिषशतकव्याख्या संपूर्णा ॥



P. P. Ac. Gunratnasuri M.S.                                        Jin Gun Aaradhak Trust

# SRIRANGAM SRI SANKARA GURUKULA SERIES.

| No. | Title | Rs. | As. | Ps. |
|---|---|---|---|---|
| No. 1. | पञ्चरत्नकारिका: A poetic commentary on the Upadesa Panchakam of Sri Sankara Bhagavatpadacharya by Sri Sadasiva ; with a *Prastavana* by Sri Sacchidananda Tirtha Swamigal. | 0 | 12 | 0 |
| No. 2. | नयमञ्जरी A poetic commentary on the Brahma Sutras, by Sri Appayya Dikshita. With a Sanskrit Introduction by Sri Sacchidananda Tirtha Swamigal. | 2 | 0 | 0 |
| No. 4 | बालभारतम् of Agastya Pandita with the Commentary *Manohara* of Salva Timmaya Daudanatha. Part I. Cantos 1–8 | 2 | 0 | 0 |
| No. 5. | कुमारसंभवचम्पूः by Sri Sarabhoji Maharaja of Tanjore; with an Introduction by Vidyasagara Vidyavacaspti P. P. Subrahmanya Sastri, B. A. (Oxon), M. A., Professor of Sanskrit, Presidency College, Madras. | 1 | 0 | 0 |
| No. 6. | डमरुकम् A Sanskrit Farce by Pandit Ghanasyama with the Commentary of Chandrasekhara; Edited by Do. | 0 | 8 | 0 |
| No. 7. | शृङ्गारप्रकाशः by Maharajadhiraja Sri Bhoja Deva. Part I, Prakasas 1 & 2 Edited by Do. | 1 | 8 | 0 |
| No. 8. | मनीषापञ्चकम् of Sri Sankara Bhagavatpadacharya with a Summary of the Commentary of Sri Sadasiva Brahmendra and a Foreword by Rao Saheb N. Natesa Iyer B.A., B.L., President, All-India Varnasrama Swarajya Sangha, Madura. Edited by Gurubhaktasikhamani T. K. Balasubrahmanya Iyer. | 0 | 6 | 0 |
| No. 9. | स्तोत्ररत्नमाला Part 1, Contains rare stotras by different ancient authors | 1 | 8 | 0 |
| No. 10. | जीवन्मुक्तिकल्याणनाटकम् by Nalla Dikshitar. | 1 | 4 | 0 |
| No. 14. | महिषशतकम् of Sri Vanchesvarakavi with the commentary of his great-grandson Sri Vanchesvara. | 1 | 8 | 0 |
| No. 15. | शिवकेशादिपादान्तस्तुतिः of Sri Sankarawith the rare commnetary of Sri Ramakrishna Suri. | 0 | 12 | 0 |

## IN THE PRESS.

No. 3. शास्त्रदीपिका of Parthasarathi Misra with the commentary *Mayukhavali* of Sri Appayya Dikshita.

No. 11. मरुत्कन्यापरिणयचम्पूः by Gangadhara Kavi.

No. 12. तत्त्वकौस्तुभः by Bhattoji Dikshita.

No. 13. सौन्दर्यलहरी with the commentaries of लक्ष्मीधरा, सौभाग्यवर्धनी and अरुणामोदिनी

The above Six books are being pnblished serially in the ***Sri Sankaragurukula Patrika***: Annual Subscription Rs. 6 only.

*Apply to* THE LIBRARIAN, *Sri Sankaragurukulam, Srirangam.*

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ श्रीः ॥

# ॥ प्रस्तावना ॥

**सहृदयाः**

विदिततममेवेदं समेषामपि गैर्वाणवाणीप्रणयिनाम्, यत् श्रुतिस्मृतीतिहासपुराणादिषु पुनः पुनरुद्घुष्यमाणमहामहिमशालिन्येतस्मिन्भारते वर्षे कृतावतारैर्यशोमात्रशरीरैः सरस्वतीकटाक्षपात्रीभूतैर्वैदुष्यवारिभिरस्मत्पूर्वपुरुषैः संप्रणीतानां तालपत्रमात्रशरीराणामपूर्वाणां कश्चिदप्यप्रकाशीकृतानां घटोदरस्थितदीपवत्क्वापि निलीनानां ग्रन्थरत्नानां प्रकाशीकरणेन संस्कृतज्ञसमाजस्य महतीमप्रतिविधेयामुपकृतिमातनोतीयं श्रीशंकरगुरुकुलाभिधाना त्रैमासिकी पत्रिका इति। तेष्वेव ग्रन्थरत्नेष्वन्यतममिदं माहिषशतकाभिधानं काव्यम् ॥

अस्य च प्रणेता श्रीमान्वाञ्छेश्वरनामा कुट्टिकविः कर्नाटजातीयोऽपि द्रविडदेशीयः शहजिराजपुरे (तिरुविशनल्लूर्) कृतवसतिरासीदिति ज्ञायते। शहजिराजश्च महाराष्ट्रदेशीयानां भोसलकुलीनानामेकोजिप्रभृतीनां तञ्जापुरमहाराजानामन्यतमः। अस्य च कालः A. D. 1684 प्रभृति 1710 पर्यन्तः। स स्वयं महापण्डितः सरसकविर्विद्वत्प्रियश्चासीदिति तत्कृतग्रन्थेभ्यस्तद्विषयकग्रन्थेभ्यश्च ज्ञायते। तेनोदारचित्तेन महाराजेन दत्ता बहवो विप्राणामग्रहाराः संप्रत्यपि विराजन्ते। तेषु ललामभूतोऽयं शहजिराजपुराभिधानः 'तिरुविसनल्लूर्' अग्रहारः। यः किल कुम्भकोणनगर्याः क्रोशद्वयदूरे कवेरजातटनिकटे विद्योतते। यं चालमकार्षुः श्रीधरवेङ्कटेशप्रभृतयो भक्ताग्रेसराः सत्कवयः। यं चोपवर्णयन्त्येतद्व्याख्यातारः स्वकीये भाट्टचिन्तामणौ— 'श्रीशहराजेन्द्रपुरे श्रीशहराजेन्द्रविष्टपैः सदृशे' इति। श्रीश-हर-अज-इन्द्राणां विष्टपैः सदृशे इत्यर्थः। अस्मिन् श्लोके श्रीशहराजेन्द्रपुरं हरिहरब्रह्मेन्द्रभुवनसमतया वर्ण्यते। 1691 तमे क्रैस्तवाब्देऽयं महाराजः स्वनाम्नाऽग्रहारमिमं निर्माप्य नानादिगन्तेभ्यस्तेषु तेषु शास्त्रेषु पारीणान्पण्डितप्रकाण्डानानाय्य तेभ्यो दत्तवान्। तत्प्रतिग्रहीतारश्च सप्तचत्वारिंशत् पण्डितवराः। तेष्वन्यतम एतद्ग्रन्थप्रणेतुः श्रीवाञ्छेश्वरस्य पिताऽपि। एतत्सर्वं तदीयदानशासनपत्रात्सम्यक् ज्ञायते। एतद्वंशीया एव परंपरया भोसलवंशीयानां महाराजानाममात्यपदवीमध्यतिष्ठन्। अयमपि स्वपूर्वजनिरूढसाचिव्यधुरं वहंस्तदा तदा राजनीतीरुपदिश्य सन्मार्गे प्रवर्तयामास महाराजम्। तथा ह्युक्तं व्याख्यानप्रारम्भे

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

—'सदमात्यकुलोत्पन्नः श्रीमान् वाञ्छेश्वरः सुधीः । शिष्टः कर्णाटजातीयो वेदवेदाङ्गपारगः । नीतिमार्गेण राजानं तत्तत्कालेऽवबोधयत् ॥ ' इति ॥

एवं स्थिते एकोजिमहाराजादनन्तरं तत्कुमारो बालकः प्रतापसिंहो यदा सिंहासनमारुरोह, तदा बालकमेनं राजानं मोहयित्वा वशीकृत्य च म्लेच्छाचाराः शूद्रप्रायाश्च केचन खलाः निखिलमप्यधिकारं स्वायत्तीकृत्य सावुसंमतान्प्रजाहितैषिणो नीतिमार्गविदुषः सर्वानपि निष्कास्य तत्तत्स्थाने स्वमार्गानुसारिणः प्रजाद्रोहिणोऽपि स्वसुखमात्रसंपादनोत्सुकाननुप्रदण्डान्खलानेव निवेशयामासुः । ते च सुभेदारप्रभृतयो राज्याधिकारिणस्तत्र तत्र क्षेत्रेषु जायमानानि धान्यानि प्रसभमन्यायेनापजह्रुः । अथापि उग्रदण्डेभ्यस्तेभ्यो भीत्या किमपि कर्तुमक्षमाः प्रजाः कालगतिं विचिन्त्य तूष्णीमेव महत् दुःखमन्वभवन् । केचित्तु देशान्तरं गताः । अयमपि तादृग्विधराजकीयोपद्रवाणां पात्रं बभूव । तदा हि राज्ञो दर्शनमपि सुदुर्लभमासीदस्य कवेः । कदाचिज्जातेऽपि कष्टेन तद्दर्शने नैतस्योपदेशममहित्खलपरिवृतो भूमिपः । स्वोपदिष्टं सर्वमपि मरुभूमावुप्तं बीजमिव विफलं जातमालक्ष्यापि निसर्गतः कृपार्द्रधीरयं यथाशक्ति प्रजाभिरनुभूयमानस्य दुःसहदुःखस्यापनोदने यत्नः कार्य इति मनसिकृत्य एकैकस्याप्यधिकारिणो गृहमगमत् । तत्रापि स्वकीयोद्यमे विफले जाते प्रजानामीदृश्यां महत्यामापदि तन्निवारणप्रयत्नं विहाय स्वसुखलाभाय देशान्तरगमनं नोचितमिति स्वस्निग्धानपि प्रवोध्यान्यां गतिमपश्यन्नन्ते अप्रमार्गाद्राजानं निवर्त्य सन्मार्गे प्रवर्तयितुं काव्यमिदं प्रणिनाय । अत्र च माहिषस्तुतितो राजनिन्दा क्रियते । एतत्सर्वं कविनैव तत्र तत्र वर्ण्यते । तदानीतनराज्याधिकारिणां दौष्ट्यं बहुषु श्लोकेषु वर्ण्यते, तेभ्यः शापोऽपि दीयते । यथा— 'राजा मुग्धमतिस्ततोऽपि सचिवास्ताम्यन्तः खलाः देशद्रोहपराः सदैव वृषलाः सर्वापहारोद्यताः ' (१२) धान्यं वाऽथ धनानि वा समधिकं कृत्वा मिथः स्पर्धया मिथ्यासाहसिनोऽभ्युपेत्य वृषला देशाधिकाराशया । तत्कोपेन नृपान्तिकस्थितजनान्वश्यान्विधाय प्रजासर्वस्वं प्रसभं हरन्ति च शठास्ते यान्तु कालान्तिकम् ॥ (१३) विद्याजीवनकुण्ठनेन च कृपावालम्बितायां चिरादापके काणिशे कुतोऽपि पिशुनाः केदारमात्रेऽवते । हा किं वच्मि सुभाहवालुमणिरंभेजुष्टहस्तान्तरं हकारस्थलसंप्रतीमुजुमुदादिस्यादयो निर्दयाः ॥' (१५) देहं स्वं परिदृश्य यदि भवता धान्यं धनं वार्जितं तत्सर्वं प्रसभं हरन्ति हि सुभेदाराः स्वकीयं यथा ॥ (१८) एतावत्त्वहमर्थये पितृपतिं देवं त्वदारोहिणं क्षिप्रं प्रापय संनिधिं ननु सुभेदारस्य महोद्रोहिणः (२०) इति । किं च, तदानीं विदुषां परिस्थितिः राजकीयाधिकारिणां तेषु विद्वेषः, स्वस्य दुरवस्था चेत्यादिकं सर्वमपि स्पष्टमेवानुवर्णयति— 'नानाजिप्रभुचन्द्रभानुशहजीन्द्रानन्दरायादयो विद्वांसः प्रभवो गताः श्रितसुधीसंदोहजीवातवः । विद्यायां द्विषबुद्धयो हि वृषलासभ्यास्तिवदानींतनाः (३) 'किं वक्ष्ये तदपि क्षितीश्वरबहिर्द्वारप्रकोष्ठस्थलीदीर्घावस्थितिरौरवाय कुरुते हा हन्त हन्त स्पृहाम् ॥' (४) 'आर्यश्रीधरमम्बुदीक्षितमिमौ दृष्ट्वा महापण्डितौ विद्यायै स्पृहये न यद्यपि वरं क्षात्रं बिभेम्याहवात्' (६) स्वत्रं स्वर्णमभूद्गताम्बुमखिनो धिक् तस्य चद्रूदर्शनीम् । प्रभातः कुट्टिकविस्तु दुर्धनिगृहद्वारेषु निद्रायते ' इत्यादिना । महिषे स्तुतेऽपि

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्य पक्षपक्षमत्स्यात् न तन्माहात्म्यप्रतिपादने तात्पर्यं कवेः। अपि तु व्यङ्ग्यमर्यादया राजनिन्दायामेव। न तत्रापि द्वेषपूर्विका प्रवृत्तिः। कदाचिदिमं प्रबन्धं श्रुत्वा राजा राजकीयाश्च प्रजाद्रोहपरतां विहाय प्रजाहितकारिणो भवेयुरित्याशयैव। एतच्च स्पष्टमेवावेदयति— 'कंचित्पश्चमं तुलाय त्रिगुणं कर्तुं प्रबन्धान् शतं त्वामालम्ब्य समुत्सहे न खलु तद्वर्णयस्य माहात्म्यतः। मद्द्रोहप्रवणाधिकारिहतकक्रोधेन तन्निन्दनव्याजात्तत्प्रभुतत्प्रभुष्वपि च वाग्दण्डो मया पात्यते॥ (१०) 'श्रुत्वेमं महिषप्रबन्धमिह ये भूपा गुणग्राहिणस्ते बुद्ध्वा निजदुर्गुणान्कविमुखात्तद्व्यङ्ग्यमर्यादया। अद्रोहेण निजाः प्रजा इव यथाधर्मं प्रजा रक्षितुं कुर्वन्तु स्वकुलक्रमागतवरान् देशाधिकारोचितान्॥ (११) एवं राजनिन्दापरेऽपि अस्मिन् काव्ये आदावन्ते च भोसलवंशीयानां राज्ञां, विशिष्य प्रतापसिंहस्य च मङ्गलान्याशास्ति— 'ये जाता विमलेऽत्र भोसलकुले सूर्येन्दुवंशोपमे राजानश्चिरजीविनश्च सुखिनस्ते सन्तु संतानिनः (१) श्रीमद्भोसलवंशदुग्धजलधेः संपूर्णचन्द्रोपमो यः शास्ति क्षितिमक्षति क्षितिपतिर्मूर्तः प्रतापः स्वयम्। दीर्घायुर्जितशत्रुरात्मजयुतो धर्मी प्रजारागवानुल्लाघोऽस्तु स निस्तुलैर्निजसभास्तारैः क्रमादागतैः' ॥ १०२॥ इति ॥

एवं सरसं सालंकारमनुपमवर्णनाचातुरीप्रकर्षं शब्दशक्त्या महिषे वर्णितेऽपि व्यङ्ग्यमर्यादया राजनिन्दापरं काव्यमिमं प्रणीय तत्र तत्र शिष्यैः प्रचारं कारयामास। क्रमेण चेदं काव्यं राज्ञः कर्णपदवीमप्यारूढम्। राजा च सद्य एव प्रबुद्धो भृशं दुःखितस्तत्क्षणमेव दुर्जनसहवासं परित्यज्य स्वयमेव शास्त्रिवर्याणां गृहमागत्य तेषां पादयोर्निपत्य, स्वीयानपराधान् सोढ्वा यथापूर्वं पुनरपि साचिव्यधुरमङ्गीकर्तुं प्रार्थयामास। शास्त्रिवर्यस्तु तदुक्तमङ्गीकृत्य तं परिसान्त्वयामास। तदुक्तं व्याख्यारम्भे— 'कदाचिद्बालको राजा मेळयित्वा खळान् बहून्। खळैस्तैः सर्वदा मुग्धो न शुश्राव हितं वचः। तेभ्यो निवर्तयन्भूपं सन्मार्गे संप्रवर्तयन्। महिषस्तुतितो राजबुद्धिं चक्रे सुनिर्मलाम्॥' इति॥

किं च, अस्मिन्काव्ये महिषस्तुतिव्याजेन श्लेषेण तस्य सार्वात्म्यं प्रतिपाद्यते। स्पष्टमेव हि तैत्तिरीयोपनिषत्प्रतिपादितसत्यज्ञानानन्दपुच्छब्रह्मरूपता वर्णिता। तस्यैव शिवविष्ण्वादिरूपेण मत्स्यकूर्माद्यवतारमूर्तित्वेन इन्द्रादिदेवतात्वेन मध्वरामानुजाद्याचार्यपुरुषत्वेन अन्यैश्च बहुभिः प्रकारैः निरूपणं कृतम्। एतच्चोपलक्षणं सर्वात्मकतायाः। सार्वात्म्यं च 'इदं सर्वं यदयमात्मा' 'एकं सद्विप्रा बहुधा वदन्ति' इत्यादिश्रुतिषु ब्रह्मण एव प्रसिद्धम्। अतोऽत्र कवेः न महिषस्य तत्तदात्मप्रतिपादने तात्पर्यम्। अपि तु महिषव्याजेन ब्रह्मण एव सार्वात्म्यं प्रतिपिपादयिषितम्। एवं चास्य प्रबन्धस्य महातात्पर्यमद्वैते ब्रह्मण्येवेत्यपि न परोक्षं प्रेक्षावताम्। व्याख्याकृताऽप्यभिहितमेतत्। यथा उपक्रमे— 'स्वीयग्रन्थस्योपनिषत्प्रतिपाद्याद्वितीयात्मप्रतिपादनद्वारा निःश्रेयसोपयोगितां तत्र तत्र प्रकटयिष्यन् महिषप्रबन्धाख्यं महाकाव्यं चिकीर्षुः' इति। उपसंहारेऽपि— 'एवं महिषं सर्वदेवात्मकत्वेन सर्वोत्कृष्टवस्तुत्वेन राज्ञोऽधिकतरत्वेन च स्तुत्वा तन्मुखेन सर्वाद्वैतं प्रबन्धपरमतात्पर्यविषयीभूतं निरूप्य' इति। राज्ञः सन्मार्गप्रवर्तनं तु अवान्तरतात्पर्यविषयीभूतमेवेत्यपि तत्रैवोक्तम्॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कवेश्चास्य ' कुट्टिकविः ' इति नामान्तरमपि श्रूयते । यथा स्वयमेव आह— ' ख्यातः कुट्टिकविस्तु ' इति । तत्र चेत्थं व्याख्या दृश्यते— ' तत्सहाध्यायिनः स्वस्य दशामाह— कुट्टिकविः स्वयं दुर्धानिनां.. इत्यादि । अन्ते व्याख्यानेऽप्युक्तम्— 'प्रीयतां कुट्टिकविना ' इति । द्राविडवाण्यां कुट्टि इत्यस्य बाल इत्यर्थः । अनेन बाल्य एव वयसि अयं सरसकवितानिर्माणचतुर आसीदिति ज्ञायते । अत्र च काचन कथा प्रसिद्धा श्रूयते । तथा हि— कदाचित् शहाजिमहाराजः श्रीमीनाक्षी-संदर्शनाय सपरिवारो मधुरां ययौ । तदा आस्थानपण्डितेन मन्त्रिवर्येण स्वपित्रा सहानतीतकौमारोऽयं बालोऽप्यगच्छत् । महाराजश्च देव्या आलयं गत्वा तत्राम्बिकां श्रीमीनाक्षीं दृष्ट्वा रोमाञ्चकञ्चुकितगात्रो भक्त्याविष्टचित्तः सन्नित्थं तुष्टाव— ' पुरि मधुरं गिरि मधुरं गरिमधुरं-धरनितम्बभाराढ्यम् । स्थूलकुचं नीलकचं बालकचन्द्राङ्कितं तेजः ॥ ' इति । तच्छ्रुत्वा तन्निकटवर्ती अयं बालो राज्ञो भक्तिपारम्यमतिसरससरलकवितानैपुण्यं चानुचिन्त्य तदुत्थमानन्दमन्तरेव नियन्तुमशक्नुवंस्तमुद्दिश्यानिर्वेमं पद्यमनुपदमेव जगौ— ' हृदि तरसा विदितरसा तदितरसाहित्यवाङ्न मे लगति । कविलोके न विलोके भुवि लोकेशस्य शाहजेरुपमाम् ॥ ' इति । एवमुत्तरक्षणे आत्मगीतश्लोकोपश्लोकनपरं मधुरं पद्यमाकर्ण्य महाराजोऽतिमात्रविस्मयाविष्टचित्तस्तस्य बालभावमनुरुध्य महता प्रेम्णा कुट्टिकविरिति तमाजुहाव । ततः प्रभृति तस्य कुट्टिकविरिति व्यवहारः प्रसिद्धिं गतः । न केवलं तस्यैव, अपि तु तद्वंशीयेष्विदानीमपि कुट्टि इति व्यावहारिकं नाम प्रसिद्धं वर्तते । इदंप्रथमतया तु एतत्कवये शहाजिराजेन प्रदत्तमेतत् । अपि च 'श्लेषकविसार्वभौमः ' इत्यपि बिरुदमस्य परिदृश्यते । माहिषशतकादपरं शतकद्वयमप्यनेन प्रणीतम् । एकं आशीर्वादशतकम्, अन्यत् धाटीशतकम् । तथा हि श्रूयते— ' चक्रे माहिषशतकं धाटीशतकं तथाऽऽशिषां शतकम् । श्लेषकविसार्वभौमः श्रीमान् वाञ्छेश्वरः स्वतन्त्रोऽसौ ॥ ' इति । आशीर्वादशतकं प्रागेव श्रीवाणीविलासमुद्रणालये मुद्रितमिदानीमपि लभ्यते । कविश्चायं आशीर्वादशतकस्यान्तिमे श्लोके मध्यार्जुनक्षेत्रविराजमानश्रीमहालिङ्गेशानोपासनया तदनुग्रहः स्वेन समवाप्त इति वर्णयति— ' पायान्मध्यार्जुनं नः सकृदपि भजतां मोक्षदं श्रीनटेशस्थानेशस्वामिनाथस्थलमतिमहितं यस्य शेषं वदन्ति । मान्धातुर्यत्र तिष्ठन् श्रियमतिविपुलां क्षेत्रवर्ये कवेः श्रीवाञ्छानाथस्य चादात्फलमपि सकलं श्रीमहालिङ्गमूर्तिः ॥ ' इति ।

काव्यस्य चास्य तत्कर्तृपरंपरायामागतेन तस्य नप्त्रा महापण्डितेन श्रीवाञ्छेश्वरेण संप्रणीतं कविहृदयनिगूढान् तांस्तान्भावविशेषान् सम्यगभिप्रकाशयत्तत्र तत्र शास्त्रीयां प्रक्रियामपि निरूपयदपूर्वं व्याख्यानमपि सहैवात्र प्रकाशीकृतमिति महदिदं प्रमोदस्थानं सहृदयानाम् । कवेः परंपरा चेत्थं श्रूयते— कुट्टिकवेः पुत्रः माधवार्यः, तत्पुत्रः नरसिंहो नाम, तस्य पुत्रोऽयं व्याख्याता वाञ्छेश्वरयज्वा । तथा ह्युक्तमनेनैव— ' तस्य नप्ता माधवार्यपौत्रः श्रीनरसिंहजः ॥ वाञ्छेश्वरो लब्धजन्मा पितृप्रोक्तेन वर्त्मना । व्याख्यास्ये संप्रणम्यैतान्माहिषं शतकं मुदा । काहं मुग्धमतिः केयं साहिती सर्वपूजिता । तथाऽपि जन्म तद्वंशे प्रवर्तयति मामिह ॥ ' इति । अयं च बाल्य एव स्वपितुर्निकटे तथा स्वग्रामे प्रसिद्धपण्डितस्य ईश्वरशास्त्रिणश्च सविधे वेदव्याकरणपूर्वमीमांसादी-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न्यष्वेष्ट । ततः स तदा वङ्गदेशे नूतनतया प्रचारितां गादाधरीं तदनुसारिणीमनुगमरीतिं चाध्येतुं कृतमतिर्बभूव । समयेऽस्मिन् दिष्ट्या स्वग्रामात् क्रोशद्वयदूरे विद्यमान 'मणलूर्' ग्रामे श्रीनिवासार्यो नाम पण्डितः वङ्गदेशे नवद्वीपं गत्वा तत्र कृत्स्नामपि चतुष्षष्टिवादात्मिकां मूलतत्त्वचिन्तामणिं सगदाधरदीधितिमधीत्य तदानीमेव स्वग्रामं प्रतिनिवृत्तोऽभूत् । ततः प्राक् चोळदेशे जगदीशभट्टाचार्यकृतव्याख्यानस्यैव आसीत् प्रचार इत्यभियुक्ताः । अत एवेदं-प्रथमतया समानीतां नव्यन्यायसरणिमुत्साहेन महता तस्मादधीतवानयं श्रीशाञ्छेश्वरः । एतांश्च स्वकीयविद्यागुरूनयं स्मरति स्वव्याख्यारम्भे— 'वन्दे दुण्ढिं महालिङ्गं विश्वेशं मणिकर्णिकाम् । ईश्वरश्रीनिवासार्याहोबलाख्यगुरूत्तमान् ॥' इति । अष्टादशवयस्कः प्रागेवायमाध्यात्मिकशास्त्रवर्जमितरेषु सर्वेष्वपि शास्त्रेषु परिनिष्ठितबुद्धिरासीत् ॥

एतस्मिन्समये भोसलवंश्यः अमरसिंहो नाम महाराष्ट्रराजः स्वयमवनिपोऽपि नैककलाकुशलो विदितविद्वद्धृदयः 'तिरुविसनल्लूर्' ग्रामनिकटवर्तिनि मध्यार्जुनक्षेत्रे श्रीमहालिङ्गेश्वरसवाये कंचित्कालमुवास । तदा तस्य सदसि वङ्गदेशात्कश्चिन्नैयायिकपण्डितः समागत्य दाक्षिणात्येष्वतिमात्रमप्रचारितेष्वपूर्वेषु तत्त्वचिन्तामणिगतवादविशेषेषु नव्यगादाधरीरीत्या पूर्वपक्षानुदभावयत् । ते वादा न ज्ञातपूर्वाश्चोळदेशीयैः । अतस्तत्रत्या नैयायिकवृद्धा उत्तरयितुमशक्नुवन्तो जोषमजुषन्त । राजाऽपि भग्नमना बभूव । अस्मिन्नवसरे अष्टादशवर्षदेशीयोऽयं कुट्टिशास्त्री तदुद्भावितं पूर्वपक्षजातं निराकृत्य पुनस्तत्पण्डितसमाधेयं पूर्वपक्षान्तरमप्यवतारयति स्म । तदा सदसि पण्डिताः प्रभवो राजा च सानन्दं साधुवादमकार्षुः । महाराजोऽमरसिंहश्च तत्त्वचिन्तामणिग्रन्थतन्नैपुण्यस्मारकं 'मणिकुट्टि' अथ वा 'चिन्तामणिकुट्टि' इति बिरुदं तस्मै प्रादात् । तदा तन्नामोट्टङ्कितः कश्चन जयस्तम्भोऽपि तत्र प्रतिष्ठापनीय इत्यप्याशयो महाराजस्यासीत् । किं तु पण्डितप्रवराः सर्वेऽपि वर्धिष्णुरयं बालो न दृष्टिदोषविषयः कार्य इति राज्ञे निवेदयामासुः । अथापि तमाशीर्वचनेन महताऽन्वगृह्णन् । इत्थं तत्त्वचिन्तामणिवादवृत्तान्तस्मारकतयैवानन्तरं प्रौढे वयसि स्वकृतानां ग्रन्थानां प्रायेण चिन्तामणिशिरस्कं नाम व्यतानीत् ॥

गच्छता कालेन तञ्जानगर्यां द्वितीयः शरभोजिमहाराजः १८०० तमे क्रैस्तवाब्दे पट्टाभिषिक्तो राज्यं शासितुं प्रारभत । स च तदा तन्नगरनिकटवर्तिनि 'ओरत्तनाडु' समाख्यग्रामे वेदशास्त्राध्ययनस्थानमेकं स्थापयामास । यत्र बहूंश्चोळदेशीयान्विद्वन्मणीन्वंशपरंपरानुभवार्हवृत्तिकल्पनापूर्वकं समेलयामास । तेष्वन्यतमत्वेन परिगणितोऽयं कुट्टिशास्त्री तत्र वसन् विद्यामध्यापयति स्म शिष्यान् । तदा तत्र 'सर्वेऽपि पण्डिताः प्रत्यहं महाराजं प्रति आशीर्वादपुरःसरं मङ्गलाक्षतान् प्रदेयासुः' इति कश्चन संप्रदायः सर्वैरपि अनुसृत आसीत् । तं च संप्रदायं यथाकालं सर्वेष्वपि पण्डितेष्वनुतिष्ठत्सु अयं कुट्टिशास्त्री पुनर्यथाविधि विहितं कर्मानुष्ठाय प्रत्यहं किंचिद्विलम्बेनैव आशीरक्षतान् प्रददाति स्म । कथमयं गतभयोऽन्वहमक्षतानां प्रदाने विलम्बते इति कैश्चिदसूयालुभिर्बोधितो राजा एकस्मिन् दिने शास्त्रिणमाहूय विलम्बकारणमप्राक्षीत् । शास्त्रिमहाशयस्तु राज्ञः पुरतः सविनयमस्य समाधानमुक्त्वा, नातः परमत्र परतन्त्रो वत्स्यामीति निश्चित्य मनसि, तस्मिन्नेव दिने तीर्थयात्राव्याजेनोत्तरां दिशं प्रति प्रतस्थे । प्रस्थाय च तस्यामेव रात्रौ

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पञ्चनदक्षेत्रमागत्य तत्राम्बिकां धर्मसंवर्धनीं बहुधा स्तुत्वाऽन्ते इत्थं विज्ञापयामास— ‘ कतीन्दुग्रामः कति चन्द्रग्रामखण्डं पुनः पूरयितुं पिचण्डम् ’ इति । इदमेकमेवार्धमिदानीं स्मर्यते । ततः सपरिग्रहः क्रमेणायं पण्डितवर्यः पुनानगराख्यं पुण्यपत्तनमाससाद । तदा तत्र ‘पेश्वे’ उपनामा बाजिरायो राज्यधुरं बभार । तस्य चास्थाने चन्द्रनारायणभट्टाचार्यो नाम नैयायिकः प्रधानपण्डित आसीत् । शास्त्रिवर्यो यदा भट्टाचार्यं द्रष्टुमैच्छत्, तदा भट्टाचार्यो दाक्षिणात्यपण्डिता न न्याये परिनिष्ठितधिय इति मत्वा नानुमतिं दर्शनाय ददौ । तदनु मासद्वयं ततोऽधिकं वा यावदुपसर्पणे कृतेऽपि दाक्षिणात्ये तस्मिन् तुच्छभावेन भट्टाचार्यः शयान एवास्मै दर्शनमदात् । तं न्यग्भावमपि मर्षयन् यदा कानिचन शास्त्रार्थविचारपराणि वाक्यानि प्रायुङ्क्त, तत्क्षणमेव शयनादुत्थाय तस्य पाण्डित्यं श्लाघमानस्तमतीवोपचचार । ततः प्रभृति तयोर्मिथः स्नेहः समवर्धत । भट्टाचार्यस्नेहेन विद्वत्पक्षपातिनो बाजिरायस्य राज्यभरणसमये कंचित्कालमास्थानपण्डितो व्यराजतायं शास्त्रिवर्यः ॥

अस्मिन्नेव समये राज्ञा बाजिरायेण ‘आपस्तम्बाश्वलायनादिश्रौतसूत्राणामिव हिरण्यकेशीयश्रौतसूत्रस्य भाष्यमद्य यावत्कैश्चिदपि न कृतम् । अतस्तत्सूत्रिणामुपकाराय भवद्भिः तस्य भाष्यं कार्यमिति प्रार्थितः सन् शास्त्रिवर्यो हिरण्यकेशीयश्रौतसूत्रं तत्सामान्यसूत्रं च व्याचख्यौ । एवं तेन राज्ञा नितान्तमादृतः शास्त्रिवर्यः कतिपयकालं तत्रोषित्वा ततो वाराणसीं प्रापत् । तत्र तदा अहोबलपण्डितो नाम कश्चिन्महात्मा आध्यात्मिकशास्त्राणि श्रीमच्छंकरभगवत्पादभाष्यादीन्यध्यापयन्नासीत् । स किल पूर्वं महीशूरराज्यभारवोढ्रा हैदराख्येन प्रसिद्धम्लेच्छप्रभुणा परमं मानितस्तदास्थानीमलमकार्षीत् । तदनु तदात्मजेन टिप्पुना विमानितः स कदाचिद्दुर्मनस्केन तेन एवमवोचि —‘ कदा भो शास्त्रिवर्य भवानस्माद्देशं मार्गमवलम्बिष्यते ’ इति । पण्डितमहाशयस्तु यथाप्रभुचितमिति सविनयमुत्तरयित्वा सद्य एव तद्राज्यादपससार । प्रापच्च वाराणसीम् । ततः कतिपयवासरानन्तरं टिप्पुराजस्य जननी हैदरप्रभोः पत्नी अहोबलपण्डिते परमया भक्त्या सनाथा तस्य स्वराज्ये वासमेव स्वराज्ययोगक्षेमकारणं मन्यमाना तं कंचित्कालमपश्यन्ती स्वपुत्रमप्राक्षीत्— ‘ कुत्र स महापण्डितः ’ इति । स तु स्वस्य दुश्चेष्टितं निगूहमानो द्रुततरमागमिष्यतीत्यनृतमेवोत्तरयति स्म । सा तु कालक्रमेण तदपराधं ज्ञात्वा तस्मिन्महात्मनि कृतापराधस्य नूनमचिरात्तव राज्यक्षयो भविष्यतीति शशाप ॥

तादृशादहोबलपण्डितादेव गृहीताध्यात्मविद्योऽयं बाल्वेश्वरशास्त्री वाराणसीं कंचित्कालमधिवसन्नध्यापयति स्म बहून् शिष्यान् शारीरकमीमांसादीनि शास्त्राणि । ये तावत्पश्चात्स्वविद्याशीलगरिम्णा श्रीशृङ्गगिरिपीठमधिरूढाः श्रीनरसिंहभारतीस्वामिन इति प्रसिद्धा अभूवन्, तेऽपि पूर्वाश्रमे वाराणस्यामेतेषां सविधे एवाध्यात्मशास्त्रमधीतवन्तः । यदा चायं बाल्वेश्वरशास्त्री वाराणस्यामवात्सीत्, तदाऽनेकान् ग्रन्थान्प्राणैषीत् । समग्रहीच्च बहूनि पुस्तकानि । एवं गच्छति काले स्वदेशागमनाय बन्धुभिः प्रार्थितः उष्ट्राश्वाद्यारोपितपुस्तकनिचयः चतुरन्तादिपरिवृतपरिवारः पुनर्महाराष्ट्रमार्गेणैव प्रत्याययौ । मध्येमार्गं महाराष्ट्रदेशीयानामतिमात्रभक्तिभरितामर्हणामाददानः, कश्चित्कैश्चिद्ब्राह्मणसत्तमैर्भगवत्पादभाष्याध्यापनाय कृताभ्यर्थनामनुसृत्य तत्र

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कंचित्कालं वसन् तेषामभिलाषं पूरयित्वा क्रमेण कर्णाटकराज्यमापत् । तस्मीत आगमनसमये तदातन 'ईस्ट् इण्डिया कम्पेनी' राज्यनिर्वाहकैर्निराबाधसंचारार्थं प्रदत्तेभ्यः अनुयायिपरिवार-निवेदकेभ्यो यात्रानुमतिपत्रेभ्यः (Pass Ports Nos 1-3) अयं यज्वा पुनानगरे धारवाडनगरे चिञ्चिनीग्रामे च तत्रत्यैर्माधवराव परशुराम् पट्टवर्धनादिभिः प्रभुभिरतिमात्रमादृतः 1818 तम-क्रिस्तवत्सरपर्यन्तं तत्र तत्रोषित्वा ततो महीशूरपुरं प्रति प्रतस्थे इति विशिष्य ज्ञायते । तत्र च तदा टिप्पुराजानन्तरं सिंहासने विराजमानः कृष्णराज ओडेयारप्रभुः महाराष्ट्रदेशात्स्वदेशं प्रत्यायान्त-ममुं शास्त्रिवर्यं यथाविधि सत्कृत्य तस्य स्वदेशे स्थिरवासमाकाङ्क्षमाणः स्वीयराज्ये धर्माधिकारिपद-वीमङ्गीकर्तुं तं प्रार्थयामास । अयमपि तदङ्गीकृत्य तत्रानेकानि हायनान्यनैषीत् । तदैव शास्त्रि-वर्यो महता वित्तव्ययेन सह ज्योतिष्टोमं नाम महाक्रतुमन्वतिष्ठद्यथाविधि । यत्र स्वशिष्याः स्वबा-न्धवाश्च आर्त्विज्यमकुर्वन् । एकदा कृष्णराज ओडेयार महाराजो यज्वानं वाजपेयं क्रतुमनुष्ठाप-यितुमीहमान एवमवोचत्— 'वाजपेयमहामखमनुतिष्ठतो भवतश्छत्रधारणेन आत्मानं कृतार्थी-कर्तुमभिलषामि' इति । यज्वा तु नित्यकर्मानुष्ठानैकमतिर्बहुपशुसाध्यं वाजपेयमनुष्ठातुं नैच्छत् । एवं कर्णाटकराज्ये महीशूरपुरमलंकुर्वाणमिमं कुट्टिशास्त्रिवर्यं राजा 'वेदमूर्ति' इति तन्महिमसं-सूचकबिरुददानेन नानाविधशिबिकातुरगपदातिप्रभृतिना परिवारेण च बहुधा सभाजयति स्म इति 1824 तमे क्रिस्तवर्षे रामेश्वरयात्राप्रस्थानसमये तेन दत्तादेशान्तरगमनानुमतिपत्रात् ज्ञायते । अत्रान्तरे कदाचित् शास्त्रिवर्यः श्रीशृङ्गगिरिपीठाधिपानां श्रीजगद्गुरूणां श्रीमदाचार्यवर्याणां श्रीनृसिंहभारतीस्वामिनां दर्शनेन आत्मानं कृतार्थयितुकामः श्रीशृङ्गगिरिमगमत् । तत्र च, ये तावत्पूर्वाश्रमे वाराणस्यामस्माच्छास्त्रिवर्यादध्यात्मशास्त्रमधीतवन्तः, त एव तदानीं तत्पीठाधिपा आसन् । एतच्च शास्त्रिभिर्न ज्ञातपूर्वमासीत् । आचार्यास्तु दर्शनायागतमेनं यज्वानमालक्ष्य, विदित्वा च तमात्मनः पूर्वाश्रमे गुरुमप्राक्षुः — 'किं मां प्रत्यभिजानन्ति भवन्तः' इति । यज्वा पुनस्तान् साक्षाद्दृष्ट्वाऽपि संन्यासिवेषेणावस्थानाद्विस्मृतपूर्वाश्रमपरिचयः सन् 'भवन्त एतत्पी-ठाधिपा आचार्या इत्येव जानामि' इति प्रत्यवदत् । 'नैतदाश्रमस्थं माम्, किं तु पूर्वाश्रमस्थितम्' इति पुनः पर्यपृच्छन् श्रीमठाधिपाः । शास्त्रिवर्यस्तु न जाने इत्यवादीत् । तत आचा-र्यवर्याः स्वस्य पूर्वाश्रमे वाराणस्यां तेषां सकाशादध्यात्मशास्त्रग्रहणवृत्तान्तमुक्त्वा तं स्मारयामासुः । तदाकर्ण्य यज्वा महान्तं प्रमोदमुपजगाम । ततः आचार्यवर्यैर्महता आदरेण संमानितः स्वगेहं प्रत्यागमत् । एवं महीशूरपुरीमधिवसन् श्रीवाञ्छेश्वरयज्वा यदा तीर्थयात्रायै रामेश्वरमगात्, तदा दीर्घकालविरहितस्वबन्धुजनदिदृक्षया स्वग्राममयासीत् ॥

समये च तस्मिन् तञ्जापुराधीशं पारंपर्यवृत्तिकल्पनासंरक्षितपण्डितप्रकाण्डमण्डलं श्रीशर-भोजिमहाराजं द्रष्टुमभिलषन् तन्नगरमाससाद । चिरकालानन्तरमागतं पण्डितमणिमतिथिसत्कारा-दिना सत्कुर्वन् महाराजः पूर्वमात्मना कृतमपराधं परिमार्ष्टुकामस्तस्य पादयोर्निपपात । तं च बहुधा बहुमन्यत । ततस्तयोर्मिथः संप्रवृत्तो नवनववृत्तान्तश्रवणकौतूहलाद्बहुधा संलापः । तदा पण्डितमण्डलमध्ये विहरन् राजपुत्रो बालः शिवाजिः तस्य कण्ठे विराजमानं कृष्णराज ओडे-

वारप्रभुणा प्रीत्या समर्पितं मरकतमणिहारं तन्मनसा सह आचकर्ष । तदनुपदमेव पण्डितवर्यस्तं मणिहारमस्मै वात्सल्येन समर्प्य समतोषयदेनम् । ततो यज्वा महाराजमापृच्छ्य स्वगृहमगात् । महाराजोऽपि स्वप्रीतिनिदर्शनाय बहुधननिचयमनुपदमेव तस्मै प्राहिणोत् ॥

एवं वाञ्छेश्वरयज्वा यदा यदा स्वग्राममाययौ, तदा तदा महीशूरपुरे राज्ञा संमानतया दत्तं छत्रचामरादिकं सर्वं स्वग्रामवर्तिशिवविष्णवालयाभ्यां समर्पयति स्म । यदा च 1839 तमे क्रिस्त्वब्दे श्रीकाञ्च्यां श्रीकामाक्ष्याः महाकुम्भाभिषेकः, तथा 1849 तमे श्रीजम्बुकेश्वराख्यदिव्यक्षेत्रे श्रीमदखिलाण्डेश्वर्यास्ताटङ्कप्रतिष्ठामहोत्सवश्च संप्रवर्तितः श्रीकाञ्चीकामकोटिपीठाधीश्वरैः श्रीशंकराचार्यैः ; तदाऽपि शास्त्रिवर्यः एतयोरुभयोरपि समययोः संनिहितः सन् तत्र कर्तव्यजातं सर्वमपि निरवहत् इति श्रूयते । तस्यास्य यज्वनः परमेश्वरे निरतिशया भक्तिरासीत् । यतः प्रतिदिनमेकादशरुद्रपूर्वकमीश्वरपूजनमन्तरा सलिलमपि पातुं नाध्यवस्येत् इति श्रूयते । तत्रापि श्रीमध्यार्जुनक्षेत्रविराजमानश्रीमहालिङ्गेश्वरस्य चरणकमलयोरतिमात्रमाबद्धाकिम् । अत एव चरमे वयसि वर्तमानः स यदा यदा स्वजन्मभूमिमाययौ, तदा तदा अहरहर्मध्यार्जुने श्रीमहालिङ्गेशमनेकस्तुतिप्रणतिपूर्वकमदृष्ट्वा न स्वापमप्याप्नुयात् इति वदन्ति प्रामाणिका वृद्धाः । एवमनवरतमीश्वरं भक्त्या भजमानः शास्त्रिवर्यः स्वभक्तिपारम्यपरिणतया श्रीमहालिङ्गशतकाख्यया कयाचित्स्तोत्ररत्नावल्या सह भगवतः श्रीमहालिङ्गेशानस्य पादपङ्कजयुगले स्वात्मानं समर्प्यान्ते प्रायः अशीतितमे वयसि भौतिकं देहमत्यजत् । अनेन शास्त्रिवर्येण कृता अन्ये ग्रन्थाः एते— हिरण्यकेशिश्रौतसूत्रव्याख्या, तत्सामान्यसूत्रव्याख्या, दत्तचिन्तामणिः, श्राद्धचिन्तामणिः ब्रह्मसूत्रार्थचिन्तामणिः, काकतालीयवादार्थः घूर्णानचन्द्रिका, तर्कसंग्रहव्याख्या, श्रीमहालिङ्गशतकम्, भाट्टचिन्तामणिः इति ॥

इत्थं महिषशतककर्तृतद्व्याख्याकृतोः श्रीवाञ्छेश्वरशास्त्रिणोः कालेतिवृत्तादिकं सर्वमपि तद्वंशीयैः तिरुविसनल्लूर ब्रह्मश्रीरामस्वामिशास्त्रिभिः लिखित्वा संप्रेषितमनुसृत्यैवात्र लिखितम् । अतस्त एवात्र प्रमाणं भवति । सव्याख्यस्यास्य मुद्रापणे च तिस्रो मातृकाः लब्धाः । एका तावत् श्रीरामस्वामिशास्त्रिभिः संप्रेषिता । अन्या अडैयार ब्रह्मश्रीरामचन्द्रशास्त्रिभिः प्रहिता । अपरा तु आदितः प्रभृति षष्टितमश्लोकपर्यन्ता पळुवूर वेदान्तपाठशालाध्यक्षैः गीतोपन्यासचतुर वेदान्तव्याख्यापक ब्रह्मश्री सुब्रह्मण्यशास्त्रिभिः प्रदत्ता । तिस्रोऽपि मातृकाः प्रायेण समानाः शुद्धा एव । आसां तिसृणामपि साहाय्यमवलम्ब्य यथामति संशोध्य प्रकाशीक्रियते । सुरभारत्यां निसर्गत एव प्रीतिभाजो गुणैकपक्षपातिनः सर्वेऽपि सहृदया अमुं प्रयासं सफलयन्तु, पुनः पुनरेतादृशग्रन्थरत्नप्रकाशीकरणाय प्रोत्साहयन्तु चास्मानिति भगवन्तमिन्दुकलावतंसं श्रीमहालिङ्गेश्वरमेव प्रार्थयामहे

इति शम् ॥

इत्थं

सहृदयवशंवदः व्याकरण-वेदान्त-विद्वान्

के. एस्. वेङ्कटरामशास्त्री

श्रीसच्चिदानन्दभारतीभाण्डाराध्यक्षः, श्रीशंकरगुरुकुलम् श्रीरङ्गम् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# ॥ महिषशतकम् ॥

## ॥ श्रीवाञ्छेश्वरकविप्रणीतम् ॥

---

स्वस्त्यस्तु प्रथमं समस्तजगते शस्ता गुणस्तोमतः

सन्तो ये निवसन्ति सन्तु सुखिनस्तेऽमी शिवानुग्रहात् ।

धर्मिष्ठे पथि सञ्चरन्त्यवनिपा धर्मोपदेशादृता-

स्तेषां ये भुवि मन्त्रिणः सुमनसस्ते सन्तु दीर्घायुषः ॥ १ ॥

वन्दे दुण्ढिं महालिङ्गं विश्वेशं मणिकर्णिकाम् । ईश्वरश्रीनिवासार्यहोबलाख्यगुरूत्तमान् ॥ १ ॥

श्रीमत्कवेरजातीरं विद्वद्वृन्दोपशोभितम् । अत्युत्तमशिवक्षेत्रविष्ण्वादिस्थानमस्ति हि ॥ २ ॥

तत्र तञ्जपुरं नाम राजस्थानमनुत्तमम् । राजानः प्रथितास्तत्र भोसलीयान्ववायजाः ॥ ३ ॥

तदमात्यकुलोत्पन्नः श्रीमान्वाञ्छेश्वरः सुधीः । शिष्टः कर्नाटजातीयो वेदवेदाङ्गपारगः ॥ ४ ॥

नीतिमार्गेण राजानं तत्तत्कालेष्वचोदयत् । कदाचिद्बालको राजा मेलयित्वा खलान्बहून् ॥ ५ ॥

खेलंस्तैः सर्वदा मुग्धो न शुश्राव हितं वचः । तेभ्यो निवर्तयन्भूपं सन्मार्गे संप्रवर्तयन् ॥ ६ ॥

महिषस्तुतितो राजबुद्धिं चक्रे सुनिर्मलाम् । तस्य नप्ता माधवार्यपौत्रः श्रीनरसिंहतः ॥ ७ ॥

वाञ्छेश्वरो लब्धजन्मा पितृप्रोक्तेन वर्त्मना । व्याख्यास्ये संप्रणम्यैतान्माहिषं शतकं मुदा ॥ ८ ॥

क्वाहं मुग्धमतिः क्वेयं साहिती सर्वपूजिता । तथाऽपि जन्म तद्वंशे प्रवर्तयति मामिह ॥ ९ ॥

काशीस्थान्पण्डितान्नत्वा लिख्यते किंचिदेव तु । तद्गृह्णन्तु मुदा व्याख्यां तन्वन्तु विपुलामपि ॥ १० ॥

नाशास्त्रं लिख्यते किंचिन्नानपेक्षितमेव च । तथाऽपि सर्वतन्त्रार्था उक्ता मूलानुसारतः ॥ ११ ॥

अथात्रभवान्श्रीवाञ्छेश्वरः कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' इत्यभियुक्तोक्तिप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां 'काव्यालापांश्च वर्जयेत्' इति निषेधस्यासत्काव्यविषयतां च पश्यन्स्वीयग्रन्थस्योपनिषत्प्रवि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पाद्याद्वितीयात्मप्रतिपादनद्वारा निःश्रेयसोपयोगितां तत्र तत्र प्रकटयिष्यन्महिषप्रबन्धाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितान्तरायनिरन्तरोपशान्तिचिरंतनसमागतसंप्रदायानुवृत्तिलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वादाशीर्निर्देशमुखेन प्रबन्धतात्पर्यविषयीभूतमर्थं संगृह्णाति—स्वस्तीति । शिवस्य परमेश्वरस्य अनुग्रहात् प्रसादात्, समस्तं सकलं जगत् भुवनं तस्मै, प्रथमं आदौ, स्वस्ति कल्याणम्, अस्तु भवतु । 'नमःस्वस्ति' इत्यादिना चतुर्थी । गुणानां शमदमादीनां स्तोमतः संघतः, शस्ताः श्रेष्ठाः सन्तः साधवः ये निवसन्ति वर्तन्ते तेऽमी सन्तः शिवानुग्रहात् इत्यनुषङ्गः । एवमग्रिमवाक्यद्वयेऽपि बोध्यम् । सुखिनः शर्मिणः सन्तु भवन्तु । धर्मिष्ठे धर्मप्रधाने पथि मार्गे अवनिपाः भूपाः संचरन्तु प्रवर्तन्ताम् । तेषां अवनिपानां ये मन्त्रिणः सचिवाः ते दीर्घायुषः चिरजीविनः सुमनसः कोमलचित्ताः, आदृतः अङ्गीकृतः धर्मस्य सुकृतस्य उपदेशः ज्ञापनं यैस्ते धर्मोपदेशादृताः । 'वाऽऽहिताग्न्यादिषु' इति परनिपातः । सन्तु भवन्तु । अत्र समस्तजगतः स्वस्तिप्रार्थनया स्वस्यापि तदन्तःपातिनः चिकीर्षितग्रन्थपरिसमाप्तिरूपाभिलषितप्राप्तिरपि प्रार्थिता भवति । तथा अविशेषेण सर्वप्राणिसंबन्धिस्वस्तिप्रार्थनया 'विद्याविनयसंपन्ने' इत्यादिभगवद्वचनोक्तद्वेष्यप्रियसाधारणसमत्वरूपब्रह्मनिष्ठत्वगुणः कवेर्व्यज्यते । द्वितीयपादेन च सतां निरस्तदुरितानां श्रेयोमात्रप्रार्थनाया अकिंचित्करत्वान्निरतिशयानन्दरूपपरमपुरुषार्थप्राप्तिरेव प्रार्थनीयेति व्यज्यते । एवं पूर्वार्धेन प्रार्थितार्थस्य राजाधीनत्वाद्राज्ञो मतिभ्रंशे सति जगतां कल्याणाप्रसक्तेस्तपःस्वाध्यायादिलोपेन साधूनामपि तन्मूलकसुखातिशयाप्रसक्तेः तदुभयसिद्ध्यर्थं तृतीयपादेन राज्ञां धर्मप्रवणता प्रबन्धपरमतात्पर्यविषयीभूता प्रार्थितेति ज्ञेयम् । राज्ञां धर्मिष्ठत्वमपि सचिवाधीनमिति तेषामैकमत्येन धर्मद्रष्टृत्वाभावे राज्ञस्तदनुपपत्तेश्चतुर्थपादेनामात्यादीनामेव बह्वाशीःप्रार्थनमिति द्रष्टव्यम् । अत्र पूर्वार्धे 'शस्ता गुणस्तोमतः' इति वाक्यार्थस्य सुखप्राप्तिहेतुत्वात्, उत्तरार्धे धर्मोपदेशादृतपदार्थस्य दीर्घायुष्ट्वहेतुत्वाच्च वाक्यार्थहेतुकं पदार्थहेतुकं च काव्यलिङ्गमलंकारः । तथा सकारतकारावृत्तिरूपव्यञ्जनानुप्रासस्य स्पष्टत्वात्तथा सं समिति स्वरानुप्रासवशाच्च च्छेकानुप्रासलाटानुप्रासावपि शब्दालंकारौ; तथा निर्दोषत्वं सगुणत्वं च बोध्यम् । तथा च 'काव्यं ह्यदुष्टौ सगुणौ शब्दार्थौ सदलंकृती' इति काव्यसामान्यलक्षणस्य 'वाच्यातिशायि व्यङ्ग्यं यदुत्तमं तद्ध्वनिश्च सः' इत्युत्तमकाव्यलक्षणस्य च संपत्तिः सुलभैवेत्यस्मत्कृतश्लेषार्थचन्द्रिकायां विस्तरः । अस्मिन्प्रबन्धे शार्दूलविक्रीडितं वृत्तम्, 'सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥ १ ॥

ये जाता विमलेऽत्र भोसलकुले सूर्येन्दुवंशोपमे
राजानश्चिरजीविनश्च सुखिनस्ते सन्तु संतानिनः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ये तद्वंशपरम्पराक्रमवशात्सभ्याः समभ्यागता-
स्ते सन्तु प्रथमानमानविभवा राज्ञां कटाक्षोर्मिभिः ॥ २ ॥

एवं मङ्गलं कृत्वा स्वोपजीव्यराजपरम्पराया आशिषं प्रार्थयते—य इति। सूर्यस्य रवेः, इन्दोश्चन्द्रस्य, यो वंशः अन्ववायः स उपमा यस्य सः तादृशः तस्मिन्, विमले निष्कलङ्के, अत्रास्मिन् प्रसिद्धे, भोसलकुले भोसलसंततौ, ये राजानो जाताः प्रादुर्भूताः ते राजानः, शिवानुग्रहात् इति पूर्वश्लोकस्थस्यानुषङ्गः। चिरं जीवन्तीति तादृशाः, सुखमेषामस्तीति तथोक्ताः, संतानं पुत्रपौत्रादिः एषामस्तीति तथोक्ताः, सन्तु भवन्तु। एवं राज्ञामाशिषं संप्रार्थ्य तदमात्यानामप्याशिषं प्रयुङ्क्ते—य इति। तद्वंशस्य भोसलवंशस्य परम्परायाः यः क्रमः पौर्वापर्यं तद्वशात् तदनुरोधात्, अस्यायममात्यः, तत्पुत्रस्य तदमात्यपुत्रः सचिवः, तत्पुत्रस्य तत्पुत्र इति रीत्येत्यर्थः। ये सभ्याः सभासदः समभ्यागताः ते अमात्याः, राज्ञां कटाक्षा ऊर्मय इव तरङ्गा इव; 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः। कटाक्षोर्मयः, तैः, प्रथमानौ वर्धमानौ मानविभवौ संमानैश्वर्ये येषां ते तादृशाः सन्तु। अनेन स्वस्यापि राजामात्यपरम्परान्तर्गतस्य प्रथमानमानविभवत्वं प्रार्थितमिति सूचितम्। अत्र विमल इति विशेषणाद्राजकुलस्य चतुर्दशराजदोषराहित्यत्वं प्रतिपाद्यते। सूर्येन्दुवंशसादृश्याद्राज्ञां धार्मिकत्वपराक्रमित्वादयो गुणा व्यज्यन्ते। कटाक्षोर्मिभिः इत्यत्र कटाक्षाणां ऊर्मिसादृश्यप्रतिपादनात् उपमालंकारः। तेन च कटाक्षाणां सभ्येषूत्तरोत्तरमाधिक्यं व्यज्यत इत्यलंकारेण वस्तुध्वनिः। 'तद्वंशपरम्पराक्रमवशात् सभ्याः' इत्यनेन सभ्यानामपि संतानवृद्धिर्व्यज्यते। तेषां सभ्यपदेनोपादानाद्वेदशास्त्रसंपत्तिरात्मगुणसंपत्तिश्च ध्वन्यते। यथाऽऽह याज्ञवल्क्यः—'श्रुताध्ययनसंपन्नाः सप्त पञ्च त्रयोऽपि वा। राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥' इति। न चास्य व्यवहारप्रकरणस्थत्वाद्व्यवहारपरिच्छेत्तृविषयत्वं मन्तव्यम्, सर्वत्रापेक्षितस्य प्रकरणलाघवेन एकत्र प्रतिपादितत्वात् ॥ २ ॥

नानाजिप्रभुचन्द्रभानुशहजीन्द्रानन्दरायादयो
विद्वांसः प्रभवो गताः श्रितसुधीसंदोहजीवातवः।
विद्यायां विषबुद्धयो हि वृषलासभ्यास्त्विदानींतनाः
किं कुर्वेऽम्ब कृपे व्रजामि शरणं त्वामेव विश्वावनीम् ॥ ३ ॥

स्वस्य महिषप्रबन्धकरणे निमित्तं वदन् तदुपोद्घाततया आदौ कृपिं प्रशंसति—नानाजीति। नानाजिः धार्मिकश्रेष्ठः अमात्यः, प्रभुचन्द्रभानू राजा, शहजीन्द्रः प्रख्यातो राजा, आनन्दरायस्तदमात्यः प्रसिद्धः, एते आद्यो मुख्या येषां ते एतादृशाः, विद्वांसो ज्ञानिश्रेष्ठाः,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रिता आश्रिताः ये सुधियः पण्डितास्तेषां संदोहः समूहः तस्य जीवातवो जीवनौषधरूपाः। 'जीवातुर्जीवनौषधम्' इति विश्वः। प्रभवो गताः; स्वस्वतपोविशेषैः प्राप्यान् शिवलोकादीनिति शेषः। इदानींतनाः अद्यतनाः प्रभवस्तु, वृषलाश्च ते असभ्याश्च पूर्वोक्तसभ्यलक्षणरहिताः; हि यस्मात्कारणात् विद्यायां श्रुतिस्मृतिपुराणादिविद्यायां विषबुद्धयः विषमिति बुद्धिर्येषां ते तथोक्ताः, सन्तीति शेषः। किं कुर्वे किं करोमीति खेदे। हे अम्ब मातेव रक्षणशीले, कृषे, विश्वावनीं विश्वस्य प्रपञ्चस्य प्राणिमात्रस्येति यावत्। अवनीं रक्षणीम्, त्वामेव शरणं रक्षित्रीम्। 'शरणं गृहरक्षित्रोः' इत्यमरः। व्रजामि भजामि। 'शूद्रं यत्नेन वर्जयेत्' इति शूद्राधिकारस्य धर्मशास्त्रनिषिद्धत्वेन पण्डितानां शूद्राधिकृतदेशे संमानाद्यभावेन जीवनासंभवात् तस्मिन्देशे सर्वेषामपि कृष्यैव जीवनं भवतीत्यर्थः। अत्र विश्वावनीमिति साभिप्रायविशेषणात्परिकरालंकारः॥ ३॥

अक्षैर्मेति ननु श्रुतिः श्रुतिपथं प्रायः प्रविष्टा न किं
सौख्यं वा हलजीविनामनुपमं भ्रातर्न किं पश्यसि।
किं वक्ष्ये तदपि क्षितीश्वरबहिर्द्वारप्रकोष्ठस्थली-
दीर्घावस्थितिरौरवाय कुरुषे हा हन्त हन्त स्पृहाम्॥ ४॥

ननु कृषेर्नीचवृत्तित्वात् श्रुत्यादिप्रमाणाभावाच्च न युक्तं कृषिकर्मेत्यत आह—अक्षैरिति। 'अक्षैर्मा' इति श्रुतिर्वेदः श्रुतिपथं श्रवणपथं प्रायः प्रायेण न प्रविष्टा किम्? इयं श्रुतिः न श्रुता किमित्यर्थः; एतादृशश्रुतिश्रवणे सतीयमाशङ्का न जायत इत्यर्थः। 'अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहुमन्यमानः' इति श्रुतिः ऋग्वेदे शाकलशाखायां सप्तमाष्टकेऽष्टमाध्याये पठिता। अक्षैर्देवनैः मा दीव्यः द्यूतं मा कार्षीः, तर्हि जीवनं कथं? तत्राह–कृषिमित् कृषिमेव इच्छब्दोऽवधारणार्थश्छन्दसि दृष्टः। कृषस्व कुरुष्व। तथा च तद्द्वारा जीवितव्यमिति भावः। कृषिं कुर्वन् बहुमन्यमानः बहुभिर्लोकैः संभाव्यमानः सन् वित्ते धनधान्यादिरूपे रमस्व क्रीडस्वेति श्रुत्यर्थो बोध्यः। एतादृशश्रुत्यर्थस्य प्रत्यक्षसंवादमप्याह—सौख्यमिति। हलजीविनां लाङ्गलजीविनाम्, अनुपमं समानरहितं सर्वोत्तमं सौख्यं हे भ्रातः न पश्यसि किम्? पश्यस्येवेत्यर्थः। भ्रातरिति प्रमाणप्रष्टारं प्रति संबुद्धिः। तदपि तथाऽपि क्षितीश्वराणां राज्ञां बहिर्द्वारं द्वाराद्बहिः विद्यमाना या प्रकोष्ठस्थली प्रदेशविशेषः तत्र दीर्घावस्थितिरेव रौरवसंज्ञकं नरकं तस्मै स्पृहाम् इच्छां कुरुषे करोषि। किं वक्ष्ये किं कथये। यदेतादृशश्रुतिलोकानुभवयोः सतोरपि कृषिं परित्यज्य दुष्टभूपसर्पणे यत्नं करोषीति भावः। हा हन्त हन्तेति खेदातिशये। दीर्घावस्थितिरौरवायेति रूपकालंकारः॥ ४॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुर्भिक्षं कृषितो न हीति जगति ख्यातं किल ब्रह्मणा-
मापद्धर्मतया मनौ च कृषिगोरक्षादिकं संमतम् ।
भूपेष्वर्थपरेषु हन्त समये क्षुण्णे च दुर्भिक्षतो
वृत्त्यर्थं कृषिमाश्रयेम भुवि नः किं वा ततो हीयते ॥ ५ ॥

ननु श्रुतितात्पर्यस्य सर्वज्ञर्षिमात्रसमधिगम्यतया केवलं श्रुतिं दृष्ट्वा कृषिग्रहणं न युक्तम् । किं चोक्तश्रुतेर्वैश्यादिपरत्वेनाप्युपपत्तेर्न ब्राह्मणपरत्वं, नापि प्रत्यक्षसुखदर्शनात्प्रवृत्तिः, कलञ्ज-भक्षणादावपि प्रत्यक्षसुखसत्त्वेन तत्रापि शिष्टप्रवृत्त्यापत्तेरित्यत आह—दुर्भिक्षमिति । कृषितः कर्षणाद्धेतोर्दुर्भिक्षं क्षामं न हि भवतीति जगति भूतले ख्यातं किल प्रसिद्धं किल? लोके कृषिं कुर्वतां दारिद्र्यं नश्यतीत्यर्थः । ब्रह्मणां ब्राह्मणानामापद्धर्मतया आपदि जीवनलोपे धर्मतया मनौ मनुस्मृतौ च कृषिगोरक्षादिकं कृषिपाशुपाल्यादिकं संमतमङ्गीकृतम् । तथा च श्रीमद्भागवते वर्णधर्मप्रकरणे—'वार्ता विचित्रा शालीनयायावरशिलोञ्छनम् । विप्रवृत्ति-श्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥' वार्ता विचित्रा कृष्यादिरूपा । वृत्तिष्वेव व्यवस्थां दर्शय-न्नापद्वृत्तीराह—'जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः । ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥' इत्यापद्धर्मतया भागवतोक्तिर्द्रष्टव्या । मनुरपि—षट्कर्मैको भवेत्तेषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥' इति । एकः शालीनः याजनाध्यापनप्रतिग्रहकृषिवाणिज्य-पाशुपाल्यैः षड्भिर्जीवति । याजनादिभिस्त्रिभिरन्यः । द्वाभ्यामपरः । चतुर्थस्त्वध्यापनेनैवेत्यर्थः । तथा च नेयं श्रुतिर्वैश्यपरा । भागवतमनुवचनाभ्यामुक्तश्रुतितात्पर्यस्य ब्राह्मणादिसाधारणधर्म-विषयकत्वेन निर्णीतत्वान्न पूर्वोक्तशङ्कावकाश इति भावः । भूपेष्वर्थपरेषु अर्थलोलुपेषु सत्सु समये काले दुर्भिक्षतः क्षुण्णे बाधिते पीडिते सति च वृत्त्यर्थं जीवनार्थं कृषिमाश्रयेम भजेम । भुवि भूमौ नोऽस्माकं ततः कृष्याश्रयणात्किं वा हीयते त्यक्तं भवति । न किमपीत्यर्थः ॥ ५ ॥

आर्यश्रीधरमम्बुदीक्षितमिमौ दृष्ट्वा महापण्डितौ
विद्यायै स्पृहये न यद्यपि वरं शास्त्रं बिभेम्याहवात् ।
वाणिज्यं धनमूलकं तदखिलं त्यक्त्वा श्रितस्त्वामहं
त्वं विद्या च धनं त्वमेव सकलं[1] त्वं मे तुलायप्रभो ॥ ६ ॥

ननु प्रभुनिकटे विद्याया अनुपयोगेऽप्यध्यापनादिना विद्याजीवनं शास्त्रसंमतम्, तदेव कुतो न कृतमित्यत आह—आर्येति द्वाभ्याम् । आर्यो यः श्रीधरः श्रीधरनामा महापण्डितः,

---

1. निखिलं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अम्बुदीक्षितोऽग्निहोत्रसोमयागादिनित्यनैमित्तिकानुष्ठाननिरतः षड्दर्शनीवल्लभः । ताविमौ महापण्डितौ दृष्ट्वा विद्यायै न स्पृहये नेच्छामि । 'स्पृहेरीप्सितः' इति संप्रदानत्वम् । तयोर्जनाध्यापनशीलयोरपि दारिद्र्यपीडितत्वादिति भावः । यद्यपि क्षात्रं क्षत्रवृत्तिः प्रजापालनराज्यसंपादनादि वरं श्रेष्ठम् । तत्र संपत्समृद्ध्या जीवनं भवतीति भावः । तथाऽप्याहवायुद्धात् बिभेमि भयं प्राप्नोमि । 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वम् । तर्हि निर्भयत्वाद्वाणिज्यं कार्यमित्याशङ्क्याह—वाणिज्यमिति । वाणिज्यं मूल्येन क्रयविक्रयद्रव्यसंप्रयोगादिकं धर्मशास्त्रप्रसिद्धं निरुपद्रवमिति शेषः । तत्रापि स्वस्याप्रवृत्तिहेतुमाह—धनमूलकमिति । धनं सुवर्णादिकं मूलं मूलकारणं यस्य तत्तादृशम् । अनेन स्वस्य धनसंपत्त्यभावेन तन्न युज्यत इति सूच्यते । तत्तस्मात्कारणात्, अखिलं पूर्वोक्तं विद्याक्षात्रवाणिज्यादिकं त्रैवर्णिकमुख्यधनागमनिमित्तं त्यक्त्वा त्वां लुलायप्रभुमाश्रितः, नान्यद्विद्यादिकमिति भावः । लुलायाश्रयेण किं भविष्यतीत्यत आह—हे लुलायप्रभो, त्वं विद्या विद्याकार्यकारी, विद्याशब्दस्य विद्याकार्ये लक्षणाङ्गीकारात् । त्वमेव धनं, धनकार्यसुखादिकारित्वात् । सकलं क्षात्रवृत्त्यादिकमपि त्वमेवेत्यर्थः । क्षात्रवृत्त्यादौ भयमुपपाद्य त्वमेव सर्वकार्यकारीत्युक्त्या महिषमूलककृष्यादौ भयादिदोषप्रसक्तिर्नास्तीत्याशय आविष्कृतः । तथा च विद्यार्जनस्य मुख्यस्यासंभवात्तीचवृत्तिरपि कृषिराश्रयणीयेति भावः ॥ ६ ॥

> विद्यापण्यविशेषविक्रयवणिग्जातः सुधीः श्रीधरः
> स्वन्नं स्वर्णमभूद्धताम्बुमखिनो धिक्तस्य षड्दर्शनीम् ।
> ख्यातः [1]कुट्टिकविस्तु दुर्धनिगृहद्वारेषु निद्रायते
> तत्सर्वं महिषेश्वराननुसृतेर्दौर्भाग्यधाम्नः फलम् ॥ ७ ॥

पूर्वश्लोकप्रतिपादितविद्याजीवनासंभवमेव स्पष्टयति—विद्येति । श्रीधरः श्रीधराख्यः सुधीः पण्डितः, विद्या वेदादिः, सैव पण्यं क्रय्यं वस्तु, तस्य विशेषविक्रयेण द्रव्यदानानुरूपाध्यापनेन; येन बहु द्रव्यं दीयते स बह्वध्याप्यते, येन स्वल्पं स स्वल्पमध्याप्यत इति विशेषविक्रयपदसूचितार्थः । वणिग्वैश्यो जातः संपन्नः, वाणिज्यस्य वैश्यधर्मत्वादिति भावः । अम्बुमखिनः अम्बुदीक्षितस्य स्वन्नं सुष्ठु अन्नं शाल्योदनादिकं स्वर्णं काञ्चनमभूत् । तस्याम्बुमखिनः षड्दर्शनीं षण्णां दर्शनानां समाहारः षड्दर्शनी तां धिक्, यद्भोक्तुमन्नमपि दुर्मिलं किं तस्य षड्दर्शन्येति भावः । तत्सहाध्यायिनः स्वस्य दशामाह—कुट्टिकविः स्वयं दुर्धनिनां दुष्टधनिकानां गृहद्वारेषु बहिःप्रदेशेषु निद्रायते स्वपितीति ख्यातः । तत्सर्वं त्रयाणामप्येतादृशं दुःखं दौर्भाग्यस्य दारिद्र्यस्य धाम्नः

1. कुट्टिसुधीस्तु

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्थानभूतात्रा महिषेश्वरस्य लुलायराजस्याननुसृतेरनुनयाभावस्य फलं प्रयोजनम् । तस्मादध्यापनेन जीवनं न संभवतीति भावः । तदुक्तं शास्त्रनिर्णये—'कपिलस्य कणादस्य गौतमस्य पतञ्जलेः । व्यासस्य जैमिनेश्चैव दर्शनानि षडेव तु ॥' इति ॥ ७ ॥

विद्वन्मा कुरु साहसं शृणु वचो वक्ष्यामि यत्ते हितं
त्यक्त्वा कामदमत्र सैरिभपतिं निर्व्याजबन्धुं नृणाम् ।
श्रीरङ्गाभिधपत्तनं प्रति सखे मा गा ज्वरस्यालयं
दूरे श्रीर्निकटे कृतान्तमहिषग्रैवेयघण्टारवः ॥ ८ ॥

ननु स्वदेशे विद्याप्रयोजनाभावेऽपि देशान्तरेषु विद्याधिक्यसंभवात्तत्र गत्वा सुखेन स्थेयमित्यत्राह—विद्वन्निति । हे विद्वन्, श्रीधरार्य, साहसं बलात्कारकार्यम् । 'साहसं तु बलात्कारकृतकार्ये दमेऽपि च' इति विश्वः । मा कुरु न कुरुष्व । ते यद्धितं सुखकरं तद्वक्ष्यामि ब्रवीमि, शृणु । कामानामभिलषितानां धनधान्यादीनां दातारं नृणां पुरुषाणां निर्व्याजबन्धुम-निमित्तोपकारिणं सैरिभपतिं लुलायप्रभुम् । 'लुलायो महिषो वाहद्विषत्कासरसैरिभाः' इत्यमरः । त्यक्त्वा परित्यज्य ज्वरस्य तापरोगस्यालयं श्रीरङ्गेत्यभिधा संज्ञा यस्य पत्तनस्य जनपदस्य तादृशं श्रीरङ्गपत्तनमित्यर्थः । मा गाः न गच्छ । कुत इत्यत आह—दूरे दूरदेशे तत्र संपद्रूपा श्रीर्लक्ष्मीः, श्रूयत इति शेषः । यद्वा दूरे श्रीः चिरकालसाध्येत्यर्थः । निकटे श्रीरङ्गपत्तनसमीपदेशे, यद्वा निकटे झटितीत्यर्थः । कृतान्तस्य यमस्य यो महिषो वाहनभूतः, तस्य या ग्रीवाबद्धा घण्टा, तस्या रवः शब्दः, श्रूयत इति शेषः । तथा च तत्र ज्वररोगाधिक्याद्वैदेशिकानां पण्डितानां तत्र धनार्जनार्थं गमनमनुचितमिति भावः । अत्र श्रीरङ्गपत्तनस्य ज्वराधिक्यप्रतिपादनेनेतरदोषाभावस्तत्रत्य-प्रभोर्विद्यापक्षपातित्वं तत्रत्यपण्डितानां विद्याजीवनं च व्यज्यते । ज्वरस्यालयमित्यत्र परिकरोऽलं-कारः । साहसमित्यस्योत्तरवाक्यैः समर्थनात्काव्यलिङ्गालंकारः ॥ ८ ॥

यं यो रक्षति तस्य स प्रभुरिति स्पष्टं हि मद्रक्षिणो
राजश्रीमहिषान्विनुत्य सफलं कुर्वेऽद्य वाग्वैभवम् ।
मत्पीडानिरतान्मदीयमहिमाभिज्ञानशून्यान्प्रभू-
न्यन्निन्दामि निशम्य तद्गुणविदस्तुष्यन्तु सन्तो नृपाः ॥ ९ ॥

एवं पूर्वोक्तरीत्या विद्याजीवनासंभवमुपपाद्य कृषिरेव कर्तव्येति श्रुतिस्मृतिप्रत्यक्षार्थापत्ति-भिर्निश्चित्य तन्मुख्यसाधनं महिषं वर्णयितुं तस्य प्रभुत्वमुपपादयंस्तद्द्वारा कृत्याकृत्यविवेकशून्याना-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मन्यायार्जितवित्तानां शिष्टंमन्यदुर्विदग्धानां मूढानां राज्ञां चरितोपदेशरूपमेतत्प्रबन्धप्रयोजनमाह—यमिति । यं पुरुषं यो नरो रक्षति पालयति तस्य स रक्षकः प्रभुरिति हि यस्मात्कारणात्स्पष्टं प्रसिद्धम् । तदिति शेषः, तस्मात्कारणात् मद्रक्षिणो मत्पालकान् राजश्रिया राजलक्ष्म्या युक्तान्महिषान्महिषाख्यप्रभून्विनुत्य विशेषेण स्तुत्वा वाग्वैभवं साहित्यप्रागल्भ्यम्, अथेदानीं सफलं सप्रयोजनं कुर्वे करोमि । मत्पीडायां मदीयहिंसायां निरतान्प्रवृत्तान् मदीयमहिम्नो मत्प्रभावस्य यदभिज्ञानं परिचयः तेन शून्यान्रहितान्प्रभून्यन्निन्दामि तद्दूषणं निशम्य श्रुत्वा गुणाविदः सद्गुणग्राहिणः सन्तः श्रेष्ठाः नृपा राजानस्तुष्यन्तु संतुष्यन्तु । अनेनैतद्ग्रन्थप्रयोजनं दुष्टानां सन्मार्गप्रवृत्तिरूपं दर्शितं बोध्यम् । अत्रापि निन्दायां हेतूपन्यासात्काव्यलिङ्गमलंकारः ॥ ९ ॥

कंचित्पश्वधमं लुलाय विगुणं कर्तुं प्रबन्धाञ्शतं
त्वामालम्ब्य समुत्सहे न खलु तद्वर्ण्यस्य माहात्म्यतः ।
मद्द्रोहप्रवणाधिकारिहतकक्रोधेन तन्निन्दन-
व्याजात्तत्प्रभुतत्प्रभुष्वपि च वाग्दण्डो मया पात्यते ॥ १० ॥

ननु महिषस्य सर्वलोकनिन्द्यस्य स्तुतिरूपप्रबन्धकरणापेक्षया मुग्धानां प्रत्यक्षहितोपदेश एव युक्त इत्यतो द्रोहप्रवणचित्तानां खलानां हितोपदेशो न फलिष्यतीत्याह—कंचिदिति । पशूनां चतुष्पदामधमं निकृष्टं विगुणं शोभनगुणहीनं त्वामालम्ब्य विषयीकृत्य शतं प्रबन्धान् शतं श्लोकान्कर्तुं रचयितुं समुत्सहे संतोषयुक्तो भवामि । तत्प्रबन्धकरणं वर्ण्यस्य महिषस्य माहात्म्यतः प्रभावाद्धेतोर्न खलु, संभवतीति शेषः । विगुणत्वपश्वधमत्वादिना वर्णयितुमयोग्यत्वादिति भावः । तर्हि किमिति प्रवृत्तिः ? अत आह—मद्द्रोहे मदीयापकारे प्रवणो जागरूको योऽधिकारिहतकः खलाधिकारी । तस्य निन्दनं दूषणमेव व्याजः, तस्मात्तत्प्रभुषु खलाधिकार्यपेक्षया किंचिदधिकेषु तत्प्रभुषु तदपेक्षया किंचिदधिकेषु च दुष्टाधिकारिषु वाग्रूपो यो दण्डः शिक्षा मया पात्यते क्षिप्यते । मूर्खाणां हितोपदेशस्य सर्वथा दुष्करत्वात्साक्षाद्धर्मोपदेशो न संभवतीति निकृष्टवर्णनद्वारैव खलाः सन्मार्गे प्रवर्तनीया इति भावः ॥ १० ॥

श्रुत्वेमं महिषप्रबन्धमिह ये भूपा गुणग्राहिण-
स्ते बुद्ध्वा निजदुर्गुणान्कविमुखात्तद्व्यङ्ग्यमर्यादया ।
अद्रोहेण निजाः प्रजा इव यथाधर्मं प्रजा रक्षितुं
कुर्वन्तु स्वकुलक्रमागत[1]नरान्देशाधिकारोचितान् ॥ ११ ॥

1. वरान्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ननु महिषस्तुत्या तेषां व्याजनिन्दाकरणे राज्ञां धार्मिकाणां तत्र रोषः स्यात्, तथा च पण्डितेषु क्रोधातिशय एव स्यादित्याशङ्क्य बुद्धिमतां राज्ञामेतत्प्रबन्धः संतोषायैव भवतीत्याह—श्रुत्वेति। ये गुणग्राहिणः सद्गुणपक्षपातिनो भूपाः, ते इमं महिषशतकप्रबन्धं श्रुत्वा कविमुखात्कविमुखनिर्गतश्लोकात् व्यङ्ग्यमर्यादया ध्वनिमार्गेण, निजाः स्वीया ये दुर्गुणाः प्रजाहिंसाप्रदाः तान्बुद्ध्वा ज्ञात्वा, निजा आत्मीयाः प्रजा अपत्यानीव प्रजा विषयवासिनीः यथाधर्मं धर्ममनतिक्रम्य, वर्णाश्रमधर्माविरोधेनेत्यर्थः। रक्षितुं पालयितुं स्वकुलक्रमागतान् स्वकीयवंशपरम्पराप्राप्तान् देशस्य राज्यस्याधिकारे पालने उचितान्योग्यान्कुर्वन्तु। अनेन राज्ञः प्रामाणिकत्वेऽपि तत्परिसरवर्तिनोऽधिकारिणः खला इति सूच्यते। तथा च राज्ञोऽपि हितोपदेशरूपत्वान्नैतत्प्रबन्धे राज्ञो द्वेष इति भावः॥ ११॥

ननु राज्ञा गुणपक्षपातित्वे खलानां देशाधिकारः [1]केन दत्त इत्याशङ्क्य धार्मिकवेषेण देशाधिकारं गृहीत्वा ब्राह्मणद्रोहे प्रवर्तमानान्खलान्न राजा जानातीत्याह—

राजा मुग्धमतिस्ततोऽपि सचिवास्तान्वञ्चयन्तः खला
देशद्रोहपराः सदैव वृषलाः सर्वापहारोद्यताः।
आशां मा कुरु चोलदेशकृषये त्वं सैरिभातः परं
शिष्टं मे त्वलमल्लकं तदपि न भ्रातस्तवास्त्यन्ततः॥ १२॥

राजेति। राजा नृपो मुग्धा मनोज्ञा मतिर्बुद्धिर्यस्य स तादृशः। ततोऽपि तदपेक्षयाऽपि सचिवा अमात्या मुग्धमतय इति विपरिणतस्यानुषङ्गः। तान्राजतदमात्यादीन्वञ्चयन्तः सर्वोत्तमधार्मिकवेषेण प्रतारयन्तः। अनेन राजतदमात्यानां मुग्धमतित्वात्तेषां सत्सङ्गे सति दुष्टान् दूरीकुर्युरिति सूचितम्। खला दुष्टा देशद्रोहे राज्यक्षोभे परा उत्कृष्टाः सदैव सर्वदैव वृषलाः शूद्रप्रायाः, शूद्रालापगात्रस्पर्शभोजनकालसंभाषणादिभिरिति भावः। सर्वापहारे प्रजासर्वस्वहरणे उद्यता उद्युक्ताः, सन्तीति शेषः। वञ्चयन्त इत्यनेन खलैः प्रतारितेन राज्ञाऽधिकारो दत्त इति सूचितम्। हे सैरिभ, त्वं चोलदेशे कृषिः कर्षणं तस्यै आशामिच्छां मा कुरु मा कार्षीः। कुत इत्यत आह—अतः परं खलाधिकारानन्तरं मे मम अन्ततः सर्वस्वनाशादलमल्लकं कौपीनं शिष्टम्। तदतिरिक्तं कृत्स्नमधिकारिभिर्लुण्ठितमित्यर्थः। 'अलमल्लकं स्यात्कौपीनम्' इति निघण्टुः। हे भ्रातः सैरिभ, तव तदपि नास्ति महिषस्य सर्वदा नग्नत्वादित्याशयः। अत्र 'सह्यसागरयोर्मध्ये श्रीकाञ्चीसेतुमध्यगः। हालास्यत्यागराजान्तश्चोलदेश इति स्मृतः॥' इति ब्रह्माण्डपुराणोक्तश्चोलदेशो बोध्यः॥ १२॥

खलकृत्यवर्णनपुरःसरं राजामात्यप्रतारणप्रकारमेव सम्यङ्निरूपयन्खलान्निन्दत्येकादशभिः—

---

1. कथं स्यादित्याशङ्क्य



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धान्यं वाऽथ धनानि वा समधिकं कृत्वा मिथः स्पर्धया
मिथ्यामाहसिनोऽभ्युपेत्य वृषला देशाधिकाराशया ।
उत्कोचेन नृपान्तिकस्थितजनान्वश्यान्विधाय प्रजा-
सर्वस्वं प्रसभं हरन्ति च शठास्ते यान्तु कालान्तिकम्[1] ॥ १३ ॥

धान्यमिति । धान्यं व्रीह्यादिकं धनं सुवर्णादिकं वा समधिकं कृत्वा अहमहमिकया शत-भारपरिमितधान्योत्पादकक्षेत्रे शतद्वयपरिमितधान्यं प्रभूणां दास्यामीत्यादि प्रतिज्ञायेत्यर्थः । मिथः परस्परं स्पर्धया कलहेन मिथ्यायां मिथ्यावादे साहसिनः साहसं हठात्कारं कुर्वन्तो वृषलाः देशाधि-कारस्य राज्याधिकारस्याशयेच्छया उत्कोचेन गूढप्रदानेन नृपान्तिके राजसमीपे स्थितान्वर्तमाना-ञ्जनान् लोकानभ्युपेत्य प्राप्य वश्यान्स्वाधीनान्विधाय कृत्वा प्रजानां विषयवासिजनानां सर्वस्वं धन-धान्यवस्त्रादिकं प्रसभं हठात्कारेण हरन्ति गृह्णन्ति; ते शूद्रप्रायाः कालस्य यमस्यान्तिकं समीपं यान्तु गच्छन्तु ॥ १३ ॥

चौर्यं नाम कृषीवलस्य सहजो धर्मो ह्यवृत्त्यन्तरै-
श्चोलेषु द्विजसत्तमैरनुचिताऽप्यङ्गीकृता सा कृषिः ।
तानेतान्वृषलाः शपन्त्यकरुणा ये दुःश्रवैर्भाषितै-
र्ये वा तान्प्रहरन्ति तन्मुखकरं भूयात्क्रमीणां पदम् ॥ १४ ॥

चौर्यमिति । कृषीवलस्य कृषिः कर्षणमस्ति यस्य स तादृशस्तस्य, 'रजःकृष्यासुति' इति वलच् । 'वले' इति दीर्घः । कर्षकस्य चौर्यं नाम धान्यतृणाद्यपहाररूपं सहजः स्वभावसिद्धो धर्मः । हि यस्मात्कारणाच्चोलेषु चोलदेशेषु अवृत्त्यन्तरैर्वृत्त्यन्तररहितैर्द्विजसत्तमैर्ब्राह्मणश्रेष्ठैः अनुचिता-ऽप्ययुक्ताऽपि सा कृषिरङ्गीकृता स्वीकृता । तस्मात्कर्षकस्य धान्यादिचौर्यं स्वाभाविकमेवेत्यर्थः । कथ-मन्यथा ब्राह्मणोत्तमाः कृषिं कुर्युरिति भावः । तानेतान्पूर्वोक्तद्विजोत्तमान् दुःश्रवैर्दुःखेनापि श्रोतु-मशक्यैर्भाषितैर्निन्दितक्रूरशब्दैरकरुणा निर्दयाः सन्तो ये वृषलाः शपन्त्यधिक्षिपन्ति, ये वा शूद्र-प्रेरितास्तान्ब्राह्मणश्रेष्ठान्प्रहरन्ति ताडयन्ति, तेषां क्रूराणां मुखकरम् अधिक्षेपसाधनं मुखं प्रहारसाधनं करादिकं च । प्राण्यङ्गत्वादेकवद्भावः । क्रमीणां कीटानां पदं स्थानं भूयादस्तु ॥

विद्याजीवनकुण्ठनेन च कृपावालम्बितायां चिरा-
दा पक्वे कणिशे कुतोऽपि पिशुनाः केदारमावृण्वते ।
हा किं वच्मि सुभाहवालुमणियंमेजुष्टहस्तान्तरं
हर्कारस्थलसंप्रतीमुजुमुद्रादित्यादयो निर्दयाः ॥ १५ ॥

---

1. लोकान्तरम्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विद्येति । विद्यया वेदशास्त्रात्मिकया जीवनस्य शास्त्रीयस्य याजनाध्यापनरूपस्य कुण्ठनेन[1] विघ्नेन च कृषावालम्बितायामङ्गीकृतायां सत्यां चिराद्बहुकालात् आ समन्तात्पक्के फलिते कणिशे सस्यमञ्जर्याम् । 'कणिशं सस्यमञ्जरी' इत्यमरः । कुतोऽपि देशात् पिशुनाः पैशुन्येन जीवन्तः केदारं क्षेत्रमावृण्वते समन्ततः परिवेष्टन्ते । किं वच्मि किं वक्ष्यामि । हा इति खेदे । के ते पिशुना इत्याकाङ्क्षायामाह—सुभाह्वालुमणियमित्यादयो दाक्षिणदेशे अधिकारसंज्ञाः प्रसिद्धाः । निर्दया निष्करुणा एतत्संज्ञकाधिकारिण आवृण्वत इति पूर्वेण संबन्धः ॥ १५ ॥

मुग्धान्धिग्धनिकान्रमामदमषीदिग्धान्विदग्धानहो
जग्धौ यद्विधषु दग्धबुद्धिविभवान्स्निग्धैः खलैरन्वहम् ।
धन्यं सैरिभमेकमेव भुवने मन्ये किमन्यैर्नृपै-
र्यो धान्यैश्च धनैश्च रक्षति जनान्सर्वोपकारक्षमः ॥ १६ ॥

मुग्धानिति । रमया लक्ष्म्या यो मदो गर्वः स एव मषी मलिनं वस्तु तया दिग्धाल्लिप्ताः, धनमदेन तिरोहितान्तःकरणा इति यावत् । तादृशान् अन्वहं प्रत्यहं जग्धौ भुक्तौ, यद्विधषु निधुवनेषु स्निग्धैर्मित्रैः खलैः दग्धो नाशितः बुद्धेर्ज्ञानस्य विभवो माहात्म्यं येषां ते तादृशान्धनिकान्मुग्धान्मूढान् धिक् । तर्हि को वा धन्य इत्यत आह—भुवने लोके धन्यं कृतार्थं सैरिभं कासरमेकमेव मुख्यमेव धन्यं धनवन्तं मन्ये, नान्यं मनुष्यमित्यवधारणार्थः । अन्यैः सैरिभेतरैर्नृपै राजभिः किं प्रयोजनम् ? तत्र हेतुमाह—यः सैरिभः धान्यैर्धनैश्च स्वश्रमार्जितैर्जनान, सर्वोपकारक्षमः सर्वेषामुपकाराणां कृषिभारवहनशकटाकर्षणादिरूपाणां क्षमः शक्तः सन् रक्षति पालयति । तथा च शिश्नोदरपरायणान्मूढान्परित्यज्य सैरिभानुवर्तनमेव युक्तमित्यर्थः ॥ १६ ॥

मत्ता वित्तमदैर्दुराग्रहभृतश्चण्डालरण्डासुता
येऽमी दुर्धनिका नितान्तपरुषव्याहारकौलेयकाः ।
तेषां वक्त्रविलोकनात्तव वरं स्थूलाण्डकोशेक्षणं
येन श्रीमहिषेन्द्र लभ्यत इह प्रायेण मृष्टाशनम् ॥ १७ ॥

मत्ता इति । वित्तमदैर्धनमदैः मत्ताः गर्विष्ठाः, दुराग्रहं अहमेव सर्वोत्तम इत्याग्रहमभिमानं बिभ्रतीति तथोक्ताः । चण्डालरण्डायाः नीचस्त्रियः सुता अपत्यरूपाः, संकरजातीया इत्यर्थः । अन्यथा कथमेतादृशं ब्राह्मणद्रोहं कुर्युरित्यर्थः । येऽमी दुर्धनिकाः अन्यायार्जितवित्तास्ते दुष्टधनिकाः, नितान्तमत्यन्तं परुषव्याहारे कटुभाषणे कौलेयकाः शुनकाः; 'कौलेयकः सारमेयः कुक्कुरो मृगदंशकः' इत्यमरः । श्ववत्कटुतरं भाषन्त इत्यर्थः । तेषां खलानां वक्त्रविलोकनान्मुखदर्श-

---

1. परित्यागेन

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

नात्, हे महिषेन्द्र तव स्थूलो महान्योऽण्डकोशस्तस्य वृषणस्येक्षणं दर्शनं वरं श्रेष्ठम्। तत्र हेतुमाह— येन कारणेन अण्डकोशेक्षणेन प्रायेण प्रायशः मृष्टाशनमुत्तमभोजनं लभ्यते प्राप्यते, जनैरिति शेषः। लाङ्गलहस्ताः कर्षका हि महिषस्य पृष्ठभागं पश्यन्तः कर्षन्ति कृष्यार्जितान्नसूपशाकशाल्योदनादिकं सुखेन भुञ्जते, न तु दुष्टधनिकाश्रिता इति भावः। अत्राप्यण्डकोशेक्षणं वरमित्यत्र हेतूपन्यासात्काव्यलिङ्गमलंकारः॥ १७॥

देहं स्वं परिदण्ड्य यद्धि भवता धान्यं धनं वाऽऽर्जितं
तत्सर्वं प्रसभं हरन्ति हि सुभेदाराः स्वकीयं यथा।
हेतुस्तत्र किलायमेव महिष ज्ञातो मया श्रूयतां
पुत्रा एव पितुर्हरन्ति हि धनं प्रेम्णा बलाद्वाऽखिलम्॥ १८॥

देहमिति। स्वं देहं शरीरं परिदण्ड्य अतीव क्लेशयित्वा भवता त्वया हि यद्धनं धान्यं वाऽऽर्जितं संपादितं तत्सर्वं स्वकीयं यथा स्वपित्राऽऽर्जितमिव सुभेदाराः प्रसभं बलात्कारेण हरन्ति। तत्र हरणे हेतुरयमेव वक्ष्यमाण एव किल मया ज्ञातः। हे महिष श्रूयताम्, हि यस्मात्कारणात् पुत्रा एव पितुर्धनमखिलं प्रेम्णा प्रीत्या वा बलाद्वा हरन्ति गृह्णन्ति। तस्मात्त्वत्पुत्रा एते सुभेदारास्त्वत्संपादितधनहारित्वादिति भावः॥ १८॥

उन्मत्ता द्रविणाधिकारवशतः स्तम्भंगता दुर्गुणैः
संजाता वृषलेशतो विरचितान्यायाविभूत्यादृताः।
केचिच्छृङ्गभृतश्च संप्रति सुभेदाराधमाः कासर
ज्येष्ठाः किं भवतो वद त्वमथ वा सत्यं कनिष्ठा इमे॥ १९॥

उन्मत्ता इति। द्रविणं द्रव्यमधिकारो देशाधिकारः तयोर्वशत उन्मत्ता उद्दामाः दुर्गुणैर्दम्भाहंकारादिभिः स्तम्भंगताः स्तब्धाः कृत्याकृत्यविवेकशून्या इत्यर्थः। वृषलानां शूद्राणामीशतः लेशात् संजाता उत्पन्नाः विरचितान्यायाश्च कृतदुर्नयाश्च ते अतिभूत्या विरुद्धैश्वर्येण लोकविद्वेषं संपादयेत्यर्थः। आदृता युक्ताश्च तादृशाः, शृङ्गं विषाणमिति वाद्यविशेषं बिभ्रतीति तादृशाः संप्रति नोऽधिकारिविशेषाश्च सुभेदाराश्चतेषामधमा नीचाः केचित् हे कासर भवतो ज्येष्ठाः किमिमे खलाः, अथवा कनिष्ठाः? महिषपक्षे द्रविणे बले अधिकारवशात् प्राधान्यवशात् दुर्गुणैर्दुष्पाशैः स्तम्भं बन्धनशङ्कुविशेषं गताः प्राप्ताः। विरचितः अन्येषां स्वपालककर्षकाणामायः वित्तं येन स तथोक्तः। विभूत्या ऐश्वर्येण निमित्तेन आदृतोऽङ्गीकृतः शृङ्गं विषाणं बिभ्रतीति तादृश इति शब्दशक्तिमूलध्वनिः। न च श्लेषः शङ्क्यः, अभिधायाः खलाधिकारिमात्रविश्रान्तत्वात्। संदेहोऽलंकारः॥ १९॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तृण्यादानजलावगाहनतनूसंघर्षणादिक्रमैः
कामं सैरिभराजराज भवतः सेवामकार्षं चिरम् ।
एतावत्त्वहमर्थये पितृपतिं देवं त्वदारोहिणं
क्षिप्रं प्रापय संनिधिं ननु सुभेदारस्य मद्द्रोहिणः ॥ २० ॥

तृण्येति । तृणानां समूहस्तृण्या; समूहार्थे यत्प्रत्ययः । तस्या दानं च जलावगाहनं च तन्वाः शरीरस्य संघर्षणं च, कर्दमादिनिरासेन श्लक्ष्णीकरणमित्यर्थः । आदिशब्देन जलपानादिकं गृह्यते । तेषां ये क्रमाः पौर्वापर्याणि तैः, हे सैरिभराजराज, भवतः चिरं बहुकालं सेवामकार्षं कृतवान् । ततः किं कार्यमित्याशङ्क्याह—अहं तु एतावदतिस्वल्पमर्थये याचे, त्वदारोहिणं त्वदारूढं पितृपतिं यमं मद्द्रोहिणः मम द्रोहं कुर्वतः सुभेदारस्य संनिधिं समीपं क्षिप्रं द्रुतं नय प्रापय । त्वत्संपादितधनापहारेण त्वद्द्रोहे निरतस्याधिकारिणोऽपकारः कर्तव्य एवेत्यर्थः ॥ २० ॥

क्षुद्बाधां यदि यासि कासरपते तर्हीदमाकर्ण्यता-
मस्माभिर्हि तृणीकृतान्भुवि सुभेदारान्सुखं भक्षय ।
निःसारानपराधलेशरहितानेतान्पलालोत्करा-
न्नित्यं भक्षयता त्वया क इव हा लोकोपकारो भवेत् ॥ २१ ॥

क्षुदिति । हे कासरपते क्षुद्बाधां बुभुक्षाजनितश्रमं यदि यासि प्राप्नोषि तर्हीदं वक्ष्यमाणमाकर्ण्यतां श्रूयताम् । अस्माभिस्तृणीकृतान् तृणतया गणितान् सुभेदारानधिकारिविशेषान् सुखमनायासं यथा तथा भक्षय तव तृणाशित्वादिति भावः । तथा सत्येव महालोकोपकार इत्याह—निःसारान्नीरसान् अपराधस्य द्रोहस्य लेशेन कणेन रहितान् शून्यानेतान्पलालोत्करान् तृणसमूहान् नित्यं सार्वकालं भक्षयता त्वया लोकोपकारः क इव, कृत इति शेषः, भवेत् न कोऽपीत्यर्थः । निरपराधितृणसमूहभक्षणापेक्षया लोकद्रोहजागरूकखलभक्षणेन लोकोपकारो महान्भवेदिति भावः । काव्यलिङ्गमलंकारः ॥ २१ ॥

कर्षंकर्षमहर्निशं वसुमतीं क्लिश्नासि किं कासर
त्वं सभ्यैरधुनातनैर्नृपसभं साकं सुखेनावस ।
न ज्ञानं न च मेऽस्ति कौशलमिति व्यर्थां मतिं मा कृथा-
स्त्वत्तो मूढतमा इमे भवसि हि त्वं तेषु वाचस्पतिः ॥ २२ ॥

कर्षंकर्षमिति । वसुमतीं भूमिं कर्षंकर्षं कृष्ट्वा कृष्ट्वा अहर्निशमहोरात्रं किं क्लिश्नासि किमर्थं खिद्यसे । अधुनातनैरिदानींतनैः सभ्यैः सभां प्रविष्टैः सह नृपस्य राज्ञः सभां नृपसभाम् 'सभा राजा-

ऽमनुष्यपूर्वा ' इति नपुंसकत्वम् । त्वं सुखेनानायासेन आवस उपविश । मे मम ज्ञानं नास्ति कौशलं सामर्थ्यं नास्तीति व्यर्थां मतिं मा कृथाः मा कार्षीः । इमे सभ्यास्त्वत्तः भवतोऽपि मूढतमा अत्यन्तमूढाः ; तेषु मध्ये हि यस्मात्कारणात् त्वं वाचस्पतिर्बृहस्पतिर्भवसि ॥ २२ ॥

एवं खलान्निन्दित्वा स्वस्य महिषप्राप्तौ निमित्तमाह—

तानाश्रित्य चिरं खलान्मधुमुचा वाचा च नुत्वा बहु-
श्रान्तोऽहं विफलश्रमस्तदुपरि द्राग्वैश्यकर्माश्रितः ।
निष्काण्यद्य शतं वितीर्य महिषाभिख्यानुपेत्य प्रभू-
न्सम्यक्तैः परिरक्षितश्च कृतवित्स्तौम्यद्य हर्षेण तान् ॥ २३ ॥

तानिति । तान् पूर्वोक्तक्रूरकर्मयुक्तान्खलान्दुष्टान् चिरं बहुकालमाश्रित्योपलभ्य मधुमुचा मधूद्गारिण्या वाचा च नुत्वा स्तुत्वा बहुश्रान्तोऽतिखिन्नः विफलो निष्प्रयोजनः श्रमः सेवा यस्य तादृशः, तदुपरि तदनन्तरम् अहं द्राक् सपदि वैश्यकर्म वाणिज्यमाश्रितः श्रितः महिषमूल्यद्रव्यप्राप्त्यर्थमित्यर्थः । अद्येदानीं वैश्यवृत्तिसमाश्रयणानन्तरं शतं निष्काणि ; निष्कमिति द्रव्यपरिमाणविशेषः ; तानि वितीर्य दत्वा महिषाभिख्यान् महिषसंज्ञान्प्रभूनुपेत्य शतनिष्कैर्महिषं क्रीत्वेत्यर्थः । तैर्महिषप्रभुभिः सम्यगुत्तमप्रकारेण परिरक्षितः संरक्षितः अहं कृतवित्कृतज्ञः सन् तान्महिषप्रभून् हर्षेण संतोषेण स्तौमि प्रशंसामि । अत्र कृतविदित्यादिसाभिप्रायविशेषणात्परिकरालंकारः ॥ २३ ॥

त्वं क्रीतोऽसि मया पणैः कतिपयैर्भर्तुं कुटुम्बं निजं
त्वं तु प्रागधमर्णतामिव भजन्स्वं क्लेशयित्वा वपुः ।
नानाधान्यसमुद्भवैर्यदकरोस्त्वं मां तथा निर्वृतं
तत्ते श्रीमहिषाद्भुतैरुपकृतैः क्रीतोऽस्मि मूल्यं विना ॥ २४ ॥

त्वमिति । मया कतिपयैः पणैर्मूल्यद्रव्यैः त्वं निजं स्वीयं कुटुम्बं कलत्रादिकं भर्तुं पालयितुं क्रीतोऽसि क्रयवश्योऽसि । त्वं तु त्वमपि प्राक्पूर्वकाले अधमर्णतां पूर्वं धनग्राहकताम्, 'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात्' इत्यमरः । भजन्निव प्राप्त इव स्वं स्वकीयं वपुः शरीरं क्लेशयित्वा नानाधान्यानां नानाविधव्रीह्यादीनां समुद्भवैः प्रादुर्भावैः मां तथा निर्वृतं सर्वोत्तमसुखिनमकरोः कृतवान् तत्तस्मात् हे महिष, अद्भुतैः श्रेष्ठैरुपकृतैरुपकारैर्मूल्यं विना क्रयं विना अहं क्रीतोऽस्मि । त्वत्कृतोपकारैस्त्वद्वश्योऽस्मीत्यर्थः ॥ २४ ॥

त्वं बद्धोऽसि हि मद्गुणैर्दृढमहं बद्धोऽस्मि च त्वद्गुणै-
स्त्वं मां रक्षसि सैरिभोत्तमसखे रक्षामि च त्वामहम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इत्यन्योन्यकृतोपकारमुदितावावामिह द्वावपि
स्थास्यावः शरदां शतं द्रुतममी नश्यन्तु नः शत्रवः ॥ २५ ॥

त्वं बद्ध इति । मद्गुणैर्मत्संबन्धिपाशैर्बद्धोऽसि । अहं चाहमपि त्वद्गुणैस्त्वदीयधनधान्यसंपादनरूपैर्बद्धो वश्यः । हे सैरिभोत्तमसखे सैरिभवरमित्र, त्वं मां रक्षसि अहं त्वां रक्षामि इत्येवंप्रकारेणान्योन्यकृतैः परस्पररचितैरुपकारैर्मुदितौ संतुष्टौ । आवां द्वावपि शरदां वत्सराणां शतं स्थास्यावः चिरं जीवावः । नः अस्माकं शत्रवो वैरिणः द्रुतं शीघ्रं नश्यन्तु म्रियन्ताम् ॥ २५ ॥

एवं दुष्टाधिकारिणां स्वरूपं वर्णयित्वा कृषिमुख्यसाधनं महिषमेव स्तौत्यष्टादशभिः—

स्तोतुं त्वां महिषाधिराज सुगुणं दीदांसते धीर्मम
त्वं च स्तुत्यतया प्रबन्धवचसां योग्योऽसि किं न्वन्वहम् ।
वित्तोन्मत्तनरेन्द्रदुर्गुणघटामिथ्यास्तवोपक्रमै-
र्वाग्भिः पर्युषिताभिरद्य भवतः कुर्वे नुतिं क्षम्यताम् ॥ २६ ॥

स्तोतुमिति । हे महिषाधिराज, सुगुणमव्याजोपकारिणं त्वां स्तोतुं प्रशंसितुं मम धीर्बुद्धिः दीदांसते इच्छति । त्वं च त्वमपि प्रबन्धवचसां ग्रन्थवचनानां स्तुत्यतया शंसनीयत्वेन योग्योऽसि किं नु । अन्वहं प्रत्यहं वित्तेन धनेन उन्मत्ता भ्रान्ताः । कृत्याकृत्यविवे[illegible]न्या इति यावत् । नरेन्द्रा राजनः तेषां ये दुर्गुणाः खलजनसंग्रहदुरभिमानित्वादयः तेषां या घटा समूहस्तस्या यो मिथ्यास्तवोऽसत्प्रस्तुतिः तस्योपक्रमैः श्रमैः पर्युषिताभिः कलुषिताभिः वाग्भिर्वचनैः नुतिं स्तुतिं कुर्वे करोमि । क्षम्यताम्, अपराध इति शेषः । महाप्रभूणां नरस्तुत्यनन्तरं स्तुतेरयुक्तत्वात्तज्जनितापराधः संभवतीति भावः ॥ २६ ॥

तानेव सुगुणानाह—

शम्बाकारुपिषाणशित्तिरियदामुञ्जालिशम्बालिका-
सूचीकारुविशेषकोद्रवतिलश्यामाकगोधूमकान् ।
त्वं सिद्धार्थकुलुत्थमुद्गतुवरीनिष्पावमाषादिकं
तं तं कालमुपेत्य सैरिभपते निष्पाद्य संरक्ष नः ॥ २७ ॥

शम्बेति । कारुविशेषेत्यन्तं द्राविडभाषाप्रसिद्धधान्यविशेषाः । सिद्धार्थः श्वेतसर्षपः 'सिद्धार्थस्त्वेष धवलः' इत्यमरः । अन्यत्स्पष्टम् । तं तं कालं तत्तद्धान्योत्पत्तिसमयमुपेत्य प्राप्य पूर्वोक्तधान्यविशेषान्निष्पाद्य जनयित्वा हे कासरपते, त्वं नोऽस्मान्रक्ष पालय ॥ २७ ॥

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

खलदोषास्त्वयि न सन्तीत्याह द्वाभ्याम्—

न ब्रूषे परुषं न जल्पसि मृषावादान्न गर्वोन्नतिं
धत्से प्रत्युत लाङ्गले नियमितः स्वं क्लेशयित्वा वपुः ।
मर्त्यानामनुपाधिजीवनकृते त्वं कल्पसे कासर
त्वय्येवं सति दुर्नृपाननुसरन्हन्तास्म्यहं वञ्चितः ॥ २८ ॥

न ब्रूष इति । परुषं क्रूरं न ब्रूषे न वदसि । मृषावादान् अनृतोक्तीः न जल्पसि न कथयसि । गर्वेणाहंकारेण उन्नतिमौद्धत्यं न धत्से न वहसि । प्रत्युत अपि तु लाङ्गले हले नियमितः बद्धः सन् स्वं वपुः स्वं शरीरं क्लेशयित्वा खेदयित्वा मर्त्यानां मनुष्याणाम्, अनुपाधि-निरुपद्रवं यज्जीवनं तत्कृते तदर्थं त्वं कल्पसे समर्थो भवसि । हे कासर एवं पूर्वोक्तरीत्या त्वयि सति विद्यमाने दुर्नृपान् दुष्टप्रभूननुसरन् अहं वञ्चितः, दैवेनेति शेषः । 'सिद्धमन्नं परित्यज्य भिक्षामटति दुर्मतिः' इति न्यायादिति भावः ॥२८॥

पैशुन्यं न हि कर्णगामि भवतो नाञ्चस्यये वञ्चना-
मेकाकारतयैव तिष्ठसि सखे सर्वास्ववस्थास्वपि ।
भूपालैरलमव्यवस्थविषयैर्दिष्ट्याऽद्य लब्धोऽसि नः
श्रीमत्कासरसार्वभौम भवता नाथेन मोदामहे ॥ २९ ॥

पैशुन्यमिति । हे श्रीमत्कासरसार्वभौम पैशुन्यं पिशुनोक्तिः भवतस्तव कर्णगामि न, भवतीति शेषः । खलवचनं न शृणोषीत्यर्थः । अये माहिष ! वञ्चनामतिसंधानं नाञ्चसि न करोषि । एकाकारतयैव एकरूपेणैव सर्वास्ववस्थास्वपि प्रत्यक्षपरोक्षादिदशास्वपि तिष्ठसि वर्तसे । अव्यवस्थविषयैः नास्ति व्यवस्था मर्यादा येषां ते अव्यवस्थाः अतीतमर्यादा विषया आचारा येषां ते तथोक्तैः भूपालैः अलं पर्याप्तम्; हे सखे दिष्ट्या दैवेन नोऽस्माभिः लब्धोऽसि । अथेदानीं भवता त्वया नाथेन मोदामहे हृष्यामः ॥ २९ ॥

न स्वप्नेऽपि दरिद्रता प्रसजति त्वामाश्रितानां नृणां
कोशे द्रव्यचयैः पतन्ति बहवः शाल्यादयो व्रीहयः ।
इत्थं सर्वजनावनप्रतिभुवे दीनावलीबन्धवे
भूयस्यो महिषाधिराज भवते भूयासुरद्याशिषः ॥ ३० ॥

न स्वप्न इति । हे महिषाधिराज, त्वामाश्रितानां त्वदुपजीविनां नृणां पुरुषाणाम्, स्वप्नेऽपि स्वप्नदशायामपि दरिद्रता अकिंचनत्वं न प्रसजति न लगति । कोशे धनधान्यागारे

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्रव्याणां सुवर्णादीनां चयैः समुदायैः सह बहवोऽनेकप्रकारा व्रीहयः शाल्यादयः पतन्ति वसन्ति। कर्षकाणां कोशवृद्धिर्भवतीत्यर्थः। इत्थमनेन प्रकारेण सर्वेषां विश्वेषां जनानामवने रक्षणे प्रविभुवे लम्पकाय दीनानां दरिद्राणां या आवली समूहः तस्या बन्धवे हितकराय भवते तुभ्यं भूयस्योऽधिका आशिष आशीर्वादा अद्येदानीं भूयासुः भवन्तु ; नीरोगदृढगात्रत्वाद्यर्थमिति भावः ॥ ३० ॥

नित्यं हन्त विवर्धमानसुमहादुष्प्राभवोत्साहव-
द्दुर्भूपालकृपालवच्युतरुशत्याकर्णनोदीर्णयोः।
निर्व्याजं मम कर्णयोस्त्वममृतं हुंकारवं चाकृथा
दिष्ट्या संप्रति सीदसीह महिष क्षेत्रेषु कृष्युन्मुखः ॥ ३१ ॥

नित्यमिति। नित्यं प्रत्यहम्, विशेषेण वर्धमानौ उपचीयमानौ सुमहान्तौ अतिबृहन्तौ दुष्प्राभवोत्साहौ दुष्प्रभुत्वदुरभिमानौ तद्वन्तो ये दुर्भूपाला दुष्टा राजानस्तेषां या कृपा करुणा तस्या लवो लेशस्तेन च्युता रहिता या रुशती क्रूरवाक्, 'रुशती वागकल्याणी' इत्यमरः। तस्या आकर्णनेन श्रवणेन उदीर्णयोर्भिन्नयोर्मम कर्णयोः श्रवणयोर्निर्व्याजं यथा तथा अमृतं सुखप्रदम्, हुंकारवं शब्दविशेषमकृथाः कृतवान्। हे महिष दिष्ट्या दैवेन संप्रतीदानीं क्षेत्रेषु केदारेषु कृष्यां कर्षणे उन्मुख उत्सुकः सन्सीदसि क्लिश्यसि च ॥ ३१ ॥

मूढाभासधनोष्मभीष्मवदनक्ष्मापालपाशाङ्गणे-
ष्वाशापाशविकृष्यमाणहृदया व्यर्थां स्थितिं तन्वते।
अस्मद्भूपतिमाश्रयन्ति न बुधाः कामप्रदं सैरिभं
योऽस्मानक्षति रक्षति क्षितिफलैः सौम्यः समस्तैरपि ॥ ३२ ॥

मूढा इति। मूढा मोहं प्राप्ता आभासा निन्दिताश्च ये, धनेन द्रव्येण य ऊष्मा क्रोधाग्निः तेन भीष्मं वदनं मुखं येषां ते तथोक्ताः, ये क्ष्मापालपाशाः कुत्सितप्रभवः; 'याप्ये पाशप्' इति कुत्सितार्थे पाशप्। तेषामङ्गणेषु चत्वरेषु आशैव इच्छैव पाशः रज्जुस्तेन विकृष्यमाणं नीयमानं हृदयमन्तःकरणं येषां ते तथोक्ताः बुधाः व्यर्थां निष्प्रयोजनां स्थितिं तन्वते। यो महिषप्रभुः समस्तैः कृत्स्नैः क्षितिफलैर्धान्यादिभिः अक्षति निरुपद्रवं यथा तथा सौम्यः अक्रोधः सन् रक्षति पालयति, तं कामानामिष्टानां धनधान्यादीनां प्रदं प्रकर्षेण दातारमस्मद्भूपतिमस्मद्राजानं नाश्रयन्ति नानुवर्तन्ते ॥

गोष्ठं ते नृपमन्दिरं शकृदपि प्रायेण कस्तूरिका
पृथ्वीरेणुरशुरुत्करस्तु वपुषः प्रत्यग्रपिष्टातकः।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

निर्व्याजोपकृतिप्रवीणमनसो मानेन लब्धोन्नतेः
सर्वं ते महिषाधिराज तदिदं भूषाविशेषायते ॥ ३३ ॥

गोष्ठमिति । गोष्ठं बन्धनस्थानम्, नृपमन्दिरं राजगृहं, ते शकृदपि विष्ठाऽपि कस्तूरिका मृगमदः, वपुषः शरीरस्य पृथ्व्या भूमेर्ये रेणवो रजांसि तेषां समुत्करः समूहः स एव प्रत्यग्रपिष्टातकः नूतनपटवासकः 'पिष्टातः पटवासकः' इत्यमरः । निर्व्याजा निर्निमित्ता या उपकृतिरुपकारस्तस्मिन्प्रवीणमतिसमर्थं मनो यस्य स तथोक्तः, तस्य, मानेन संभावनेन लब्धा प्राप्ता उन्नतिः प्रतिष्ठा यस्य तादृशस्य हे महिषाधिराज ते सर्वमिदं शकृद्धूल्यादिकं भूषाविशेषायते भूषाविशेष इवाचरति ॥ ३३ ॥

हा जानुद्वयसे दुरुद्धरपदे पङ्के वहँल्लाङ्गलं
पश्चाच्छूद्रकरप्रतोदघटनासंजातभूरिव्रणः ।
क्लेशं यासि हि कोशपूरणकृते राज्ञः स तु द्रुह्यति
ब्रूमः किं महिषेन्द्र ते शिव शिव त्वद्भागसर्वस्वहृत् ॥ ३४ ॥

हेति । जानुद्वयसे जानुदघ्ने 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति द्वयसच्प्रत्ययः । दुरुद्धरं दुःखेनापि उद्धर्तुमशक्यं पदमङ्घ्रिर्यस्मिंस्तादृशे पङ्के कर्दमे लाङ्गलं हलं वहन् पश्चात्पृष्ठभागे शूद्रकरेण कर्षकहस्तेन प्रतोदस्य प्राजनस्य 'प्राजनं तोदनं तोत्रम्' इत्यमरः । घटनया संयोजनेन संजातमुत्पन्नं भूरि व्रणं यस्य स तथोक्तः त्वं राज्ञो नृपस्य कोशस्य धनधान्यागारस्य पूरणकृते वृद्ध्यर्थं क्लेशं दुःखं यासि प्राप्नोषि। स तु राजा तु त्वद्भागसर्वस्वं कृषीवलपञ्चभागान्हरतीति तादृशः सन् हे महिषेन्द्र ते तुभ्यं द्रुह्यति। 'क्रुधद्रुह...' इत्यादिना चतुर्थी। शिव शिवेत्याश्चर्ये। किं ब्रूमः; अतो महोपकारिणस्तव सर्वस्वहरणरूपद्रोहकरणं न सांप्रतमिति भावः ॥ ३४ ॥

मूढाः केचिदुपाश्रयन्ति धनिकान्क्लिश्यन्तु नश्यन्तु वा
यो मामाश्रयते तमेव बिभृयामात्मप्रयासैरिति ।
मृष्टान्नैकवदान्य सैरिभपते हुंभारवव्याजतो
घण्टाघोषपुरःसरं वितनुषे सम्यक्प्रतिज्ञामपि ॥ ३५ ॥

मूढा इति । केचिन्मूढा मुग्धा धनिकानुपाश्रयन्ति अनुवर्तन्ते, त इति शेषः। क्लिश्यन्तु खिद्यन्तु नश्यन्तु वा । यो नरः मामाश्रयते अनुसरति तं नरम्, आत्मनः स्वस्य प्रयासैः श्रमैः कर्षणभारवहनादिभिर्बिभृयां बिभर्मि इत्यनेन प्रकारेण हुंभारवस्य शब्दविशेषस्य व्याजतश्छलतः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मृष्टान्नस्य भक्ष्यभोज्यादियुक्तान्नस्य एकवदान्य दातृश्रेष्ठ हे सैरिभपते घण्टायाः ग्रीवाबद्धाया घोषः शब्दः पुरःसरः पूर्ववृत्तिर्यस्मिन्कर्मणि तद्यथा तथा सम्यक्समीचीनां प्रतिज्ञां वितनुषे करोषीव । उत्प्रेक्षालंकारः ॥ ३५ ॥

ख्यातानाहरतु क्रतूनपि शतं क्रूरं विधत्तां तपो
योगाभ्यासमुपैतु वा कलयतां तीर्थाटनं वा पुनः ।
त्वत्संदर्शनमन्तरा न महिष प्राप्नोति लोकः शुभा-
न्हंहो पश्वधमोऽपि सैरिभ गुणैः श्लाघ्योऽसि लोकोत्तरैः ॥ ३६ ॥

ख्यातानिति ॥ ख्यातान् प्रसिद्धान् शतं शतसंख्याकान् क्रतून ज्योतिष्टोमादीन आहरतु करोतु । क्रूरं दुश्चरं तपः नियमादि विधत्तामनुष्ठीयताम् । योगस्याष्टाङ्गयुक्तचित्तवृत्तिनिरोधस्य अभ्यासमावृत्तिमुपैतु प्राप्नोतु वा । तीर्थाटनं तीर्थस्य धनुष्कोटिप्रयागादितीर्थस्याटनं स्नानं पुनः मुहुः कलयतां क्रियताम् । तथाऽपावि शेषः । हे सैरिभ, त्वत्संदर्शनं त्वत्सहवासमन्तरा विना लोको जनः शुभान् यज्ञदानभोगादीन् न प्राप्नोति । हे महिष त्वं पश्वधमोऽपि पशुषु चतुष्पात्सु अधमोऽपि निकृष्टोऽपि लोकोत्तरैः भुवनश्रेष्ठैः गुणैः सस्योत्पत्तिद्वारा लोकजीवनयागोपयुक्तहवि-र्निष्पादनादिभिः श्लाघ्योऽसि । हंहो इत्याश्चर्ये । स्वभावतो निकृष्टोऽपि गुणैरुत्कृष्टो भवतीत्यर्थः ॥

त्वामादौ गणयन्ति मूढगणनप्रस्तावनायां जना-
स्ते मूढा महिमाविदस्तव न ते मृष्यामि तां वाच्यताम् ।
सस्योत्पत्तिनिदानमस्यथ हविर्मूलं सुराणामपि
ब्रूमः किं बहु कासरेन्द्र जगतामाधारतां गाहसे ॥ ३७ ॥

त्वामिति । मूढानां मुग्धानां यद्गणनं संख्यानं तस्य प्रस्तावनायां प्रसक्तौ आदौ प्रथमं त्वां भवन्तं गणयन्ति मन्यन्ते । ते गणका मूढास्तव महिमाविदः महिम्नः माहात्म्यस्य अविदः ज्ञातारो न भवन्ति । साध्याभाववदवृत्तित्वम् , घटानधिकरणमित्यादिवत् नञो मध्यनिवेशः साधुः । यद्वा महिषाविद इति पाठः । हे महिष तव अविदः त्वदनभिज्ञास्त्वद्गुणानभिज्ञा इति तदर्थः । ते तव तां वाच्यतां निन्द्यताम्; अहमिति शेषः । न मृष्यामि न सहे । सस्यानां शाल्यादीनामुत्पत्तौ जनने निदानमादिकारणमसि । अथापि च सुराणामिन्द्रादीनां हविषां व्रीहिदधिसर्पिःप्रभृतीनां मूलं कारणम्; असीत्यनुषङ्गः । जगतां भूस्वर्लोकप्रभृतीनामाधारतां पालकतां गाहसे प्राप्नोषि । किं ब्रूमः किं वदामः । काव्यलिङ्गमलंकारः ॥ ३७ ॥

P. P. Ac. Gunratnasuri M.S.                                   Jin Gun Aaradhak Trust

दुर्वाणीकसमुद्यदुद्भटभटश्रेणीकरव्यापृत-
द्राघीयःस्फुटधूमवर्तिविगलद्धूमान्धकारावृते ।
तन्निष्ठीवनपूतिगन्धभरिते भूपालबाह्याङ्गणे
वासक्लेशहराय सैरिभपते मन्नाथ तुभ्यं नमः ॥ ३८ ॥

दुर्वाणीकेति । मन्नाथ मद्रक्षक सैरिभपते, दुर्वाणीकाः क्रूरवचनाः समुद्यन्तः आगन्तूनामभिक्षेपे दत्तोद्योगाः, उद्भटा उद्धता ये भटाः भृत्याः शस्त्रधारिणस्तेषां या श्रेणी पङ्क्तिस्तस्या ये कराः; श्रेणीशब्देन श्रेणीप्रविष्टा लक्ष्यन्ते । तेषु व्यापृता विस्तारिता द्राघीयसी दीर्घा स्फुटा प्रकाशमाना, अग्निदग्धेति यावत् । धूमवर्तिः धूमपानार्थकल्पिता दशा तस्याः सकाशाद्विगलन्निःसरन्यो धूमः, तस्माद्योऽन्धकारः ध्वान्तं, तेनावृते व्याप्ते, तेषां भटानां निष्ठीवनेनाम्बूकृतेन यः पूतिगन्धः दुर्गन्धः, तेन भरिते व्याप्ते, भूपालानां राज्ञां बाह्याङ्गणे बाह्यप्रदेशे योवासः निवासः तस्मिन्, पण्डितानां दुष्टराजगृहे शीघ्रप्रवेशाभावेन बाह्यप्रदेशे निरुक्तगुणविशिष्टे चिरावासंभवादिति भावः । क्लेशहराय दुःखहारिणे तुभ्यं नमः । अस्त्विति शेषः । कृषिकर्मव्यापृतानां किं राजाश्रयणदुःखेनेति भावः ॥ ३८ ॥

केदारे महिषीमनोजगृहमाघ्रायोन्नमय्याननं
दन्तान्किंचिदभिप्रदर्श्य विकृतं कूजन्खुरैः क्ष्मां खनन् ।
प्रत्यग्रायितसूरणाङ्कुरनिभं तत्किंचिदुज्जृम्भय-
न्नानन्दं महिषेन्द्र निर्विशसि यत्तद्द्रष्टृनेत्रोत्सवः ॥ ३९ ॥

केदार इति । केदारे शाल्यादिक्षेत्रे महिष्या मनोजगृहं मन्मथमन्दिरमाघ्राय आननं मुखमुन्नमय्य दन्तान्दशनान् किंचिदभिप्रदर्श्य दर्शयित्वा विकृतं यथा तथा कूजन् क्रोशन् क्ष्मां भूमिं खुरैः पदाग्रैः खनन्दलयन्, प्रत्यग्रायितस्य नवोद्गतस्य सूरणस्य कन्दविशेषस्य 'अर्शोघ्नः सूरणः कन्दो गण्डीरस्तु समष्ठिला' इत्यमरः । अङ्कुरनिभमङ्कुरसदृशं तादृशं तत्; स्वीयलिङ्गमित्यर्थः । किंचिदुज्जृम्भयन् बहिः कुर्वन् हे महिषेन्द्र त्वमानन्दं संतोषं निर्विशसि प्राप्नोषीति यत्तद्द्रष्टृणां नेत्राणामुत्सवः संतोषः । अनेन च भवतैव जनानां नेत्रानन्दोऽपीति भावः ॥ ३९ ॥

पर्णानां पयसां च नित्यमशनैः कालं क्षिपन्वर्तसे
निष्कम्पस्तपसि स्थितोऽपि निभृतं त्वं पर्णशालान्तरे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शेषे स्थण्डिल एव चानुदिवसं द्विस्त्रिर्निमज्जस्यपि
प्राथ्र्यं किं तव कासरेन्द्र यदृषेश्चर्यां समालम्बसे ॥ ४० ॥

**पर्णानामिति** । पर्णानां दलानां पयसां जलानां च नित्यं प्रत्यहमशनैर्भक्षणैः कालं समयं क्षिपन्गमयन्वर्तसे तिष्ठसि । निष्कम्पः सन्निश्चलः सन् तपसि माघमासे 'तपा माघेऽथ फाल्गुने' इत्यमरः । भूमावेव पर्णशालान्तरे उटजमध्ये निभृतं स्थितोऽसि वर्तसे । अनुदिवसं प्रतिदिनं स्थण्डिल एव शेषे स्वपिषि । द्विस्त्रिर्द्वित्रिवारं निमज्जसि स्नासि । हे कासरेन्द्र ऋषेश्चर्यां मुनिचर्यां यद्यस्मात्समालम्बसे अङ्गीकरोषि; सोऽपि ऋषिः पर्णजलाद्याहारं कृत्वा पर्णशालायां तपः करोति । प्रतिदिनं प्रातर्मध्याह्नसायंकालेषु स्नाति । तस्मात्तव किं प्राथ्र्यम् ? अभिलषितं किमस्तीति शेषः ॥ ४० ॥

शीतं वारि सरोग एव हि पिबस्याकण्ठमत्यादरा-
त्संतापेऽप्यतनुप्रमोदभरितो न ग्राम्यधर्मोज्झितः ।
यच्चित्रं सुखसंनिपातरहितः पुष्णासि पुष्टिं तनौ
तन्मे ब्रूहि किमौषधं महिष रे श्लाघ्यं त्वया भक्षितम् ॥ ४१ ॥

**शीतमिति** । शीतं शीतलं वारि जलं सरः कासारं गच्छतीति सरोगः, आकण्ठं कण्ठपर्यन्तमत्यादरात्पिबसि पासि । सरोगस्य रोगयुक्तस्य शीतोदकपानं संनिपातरोगप्रदमिति वैद्यशास्त्रप्रसिद्धम् । त्वं तु सरोग एव शीतं वारि पिबसि; तथाऽपि संनिपातरहित इत्यौषधं भक्षितमित्यनुमीयत इत्यर्थः । संतापेऽपि सूर्यकिरणादिनाऽत्यन्तोष्मण्यप्यतनोर्मन्मथस्य प्रमोदेन संतोषेण भरितः सन् ग्राम्यधर्मेण निधुवनेन 'व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम्' इत्यमरः । नोज्झितः न त्यक्तः । अत्र संतापसमये स्त्रीसङ्गमनिषेधो वैद्यके; यथा—'तरुणज्वरमध्ये तु युवतीसङ्गमेन च । जायते दारुणो दोषो ह्यङ्गवैकल्यकम्पदः ॥ वक्षोऽन्तरे च संतापः प्रलापोत्थापसंभ्रमः । पाणिपादतले शैत्यं दोषः स्त्रीसङ्गजो भवेत् ॥ तदूरुजेन रक्तेन नेत्रयो रञ्जयेत्कणान् । सद्यस्तद्दोषशान्तिः स्यादात्रेयमुनिभाषितम् ॥' इति । यद्यस्मात्सुखसंनिपातेन रोगविशेषेण रहितः सन् तनौ शरीरे पुष्टिं वृद्धिं पुष्णासि । चित्रमित्याश्चर्ये । तत्तस्मात् रे महिष किं श्लाघ्यं प्रशस्तमौषधं सेवितं पथ्यादिना भक्षितं तन्मे ब्रूहि वद ॥ ४१ ॥

स्वीयोत्सङ्गसमाधिरूढमधिकासक्तिं वहन्नात्मजं
बालं च प्रमदान्वितः सुखमहो निद्रासि निश्चिन्तधीः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुर्भूपास्यमपास्य नैककृतिना प्रारब्धलब्धेन च
प्रीतस्तिष्ठसि कासरेश्वर भवद्गार्हस्थ्यमेवाद्भुतम् ॥ ४२ ॥

स्वीयेति । स्वीयोत्सङ्गे स्वाङ्कप्रदेशे समारूढमारुह्य स्थितम्, अधिका बह्वी आसक्तिः प्रीतिर्यस्य तथोक्तम्, बालं शिशुमात्मनः सकाशाज्जायत इति तादृशं वहन्प्रमदया स्त्रिया महिष्येति यावत् । मत्त इत्यपि ध्वन्यते । निश्चिन्ता निर्विचारा धीर्ज्ञानं यस्य तादृशः, सुखं निद्रासि स्वपिषि । दुर्भूपानां दुष्टप्रभूणामास्यं मुखमपास्य परित्यज्य, शूद्रप्रभुमुखावलोकनमकृत्वेत्यर्थः । नैका अनेकप्रकारा कृतिः प्रयत्नो यस्य स तादृशः तेन प्रारब्धेन प्रारब्धकर्मणा लब्धं प्राप्तं तेन प्रीतः संतुष्टः सन् तिष्ठसि वर्तसे । हे कासरेश्वर भवत्संबन्धि यद्गार्हस्थ्यं गृहस्थधर्मस्तदेवाद्भुतं श्रेष्ठम्, अहो इत्याश्चर्ये ॥ ४२ ॥

नित्यं दुर्धरदुर्मुखादिसहितः शृङ्गाग्रकृष्टाचलः
प्रायस्त्वं महिषः स एव भुवने हन्तावतीर्णः पुनः ।
किं तु प्राप्तयुगानुरूपचरितः सर्वोपकारी भवा-
न्भ्रातः कासरवर्य निर्जरगणाः कुर्वन्तु ते मङ्गलम् ॥ ४३ ॥

नित्यमिति । नित्यं प्रत्यहम्, दुर्धरदुर्मुखादिभिरसुरविशेषैः सहितो युक्तः, दुर्धरं दुःखेनापि धर्तुमशक्यं यद्दुर्मुखं कुत्सितमुखं तेन युक्त इति प्रकृतार्थः । शृङ्गाग्रेण विषाणाग्रेण कृष्टः अचलः पर्वतो येन स तादृशः, त्वं स एव युगान्तरप्रसिद्धमहिषासुर एव पुनरपि प्रायः प्रायेणावतीर्णोऽसि, अवतारं प्राप्तवानसि । तर्हि कथं न लोकानुत्सादयसीत्यत आह—किं त्विति किं त्वपि तु प्राप्त अधिगतो यो युगः कलिः, गलबद्धदारुविशेषश्च, तस्यानुरूपं योग्यं चरितमाचरणं यस्य स तादृशः । तथा च कलियुगे महिषासुरोपद्रवं जनाः सोढुं न शक्नुवन्तीति मत्वा सौम्यरूपोऽसीत्यर्थः । प्रकृते लाङ्गलबद्धस्य लोकोपकारं विना किमन्यत्कार्यमिति भावः । भवान्सर्वोपकारी सस्योत्पत्तिहेतुत्वात्, भवतीति शेषः । हे भ्रातः, कासरवर्य, निर्जरगणा देवसमूहास्तव मङ्गलं शुभं कुर्वन्तु तन्वन्तु, न तु महिषासुरबुद्ध्या द्वेषमिति भावः ॥ ४३ ॥

पीत्वा वारि सरोवरेषु विपिने स्वैरं चरित्वा तृणा-
न्या कल्यादपि चापराह्णविगमात्कृष्ट्वा महीं सर्वतः ।
ये रक्षन्त्यनपायमेव भुवनं संत्यज्य तान्सैरिभा-
न्धिग्धिग्दुर्धननिर्गदमान्मृगयते सेवार्थमज्ञो जनः ॥ ४४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पीत्वेति । सरोवरेषु कासारश्रेष्ठेषु वारि जलं पीत्वा, विपिने अरण्ये स्वैरं स्वच्छन्दं तृणानि चरित्वा भक्षयित्वा, आ कल्यादपि प्रातःकालप्रभृति 'प्रत्यूषोऽहर्मुखं कल्यम्' इत्यमरः । आ च अपराह्णविगमात् अपराह्णनिवृत्तिपर्यन्तं सर्वतोऽभितः महीं भूमिं कृष्ट्वा विलिख्य अनपायमेव निरुपद्रवमेव यथा भवति तथा भुवनं जनम्, 'लोकस्तु भुवने जने', ये सैरिभाख्यप्रभवः रक्षन्ति पालयन्ति, तान्सैरिभान्संत्यज्य परित्यज्य दुर्धनिन एव गर्दभा रासभाः, कृत्याकृत्यविवेकशून्यत्वेन रासभवन्निन्द्या इत्यर्थः । अज्ञो मूढो जनः सेवार्थमनुसरणार्थं मृगयते अन्वेषते । तं जनं धिक् धिगिति निन्दायाम् ॥ ४४ ॥

उद्दामद्विरदद्वयद्वयसतामुच्चैर्बलं निस्तुलं
दुर्भेदाद्भुतफालभूमिदलनेष्वग्रेसरत्वं तथा ।
तत्सर्वं महिषावतंस कृषिभिः संसारपोषार्थिनो
मन्ये हन्त पचेलिमामिह पुनर्मद्भागधेयोन्नतिम् ॥ ४५ ॥

उद्दामेति । उद्दाममुन्नतं यद्द्विरदद्वयं गजद्वयं प्रमाणं यस्य स उद्दामद्विरदद्वयद्वयसः, तस्य भावस्तत्ता ताम्, 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति द्वयसच्प्रत्ययः । निस्तुलमनुपमम्, उच्चैरधिकं बलं तथा दुर्भेदः कठिनः अद्भुतः समीचीनो यः फालः कृषकलाङ्गलम्, तेन भूमिदलनेषु भूविदारणेषु अग्रेसरत्वं मुख्यत्वं तत्पूर्वोक्तं सर्वम्, हे महिषावतंस, कृषिभिः कर्षणैः संसारस्य पुत्रमित्रकलत्रादेः पोषं पालनमर्थयत इति तादृशस्य मे भागधेयस्य दैवस्योन्नतिमुच्छ्रयम्; 'दैवं दिष्टं भागधेयम्' इत्यमरः । पचेलिमां परिपक्वां मन्ये । हन्तेत्याश्चर्ये ॥ ४५ ॥

मूर्ता किं तमसां छटा किमथवा नीलाचलो जङ्गमो
जीमूतः किमु संचरिष्णुरवनौ पादैश्चतुर्भिर्युतः ।
इत्येवं किल तर्कयन्ति मसृणस्त्वं मांसलः श्यामलो
येषां सैरिभमण्डलेश्वर दृशां पन्थानमारोहसि ॥ ४६ ॥

मूर्तेति । तमसामन्धकाराणां छटा समुदायः मूर्ता किं मूर्तिमती किम् ? नीलाचल नीलपर्वतः जङ्गमः संचरिष्णुः किम् ? जीमूतो मेघः संचरिष्णुः संचारशीलः, अवनौ भूमौ चतुर्भिः पादैर्युतः किमु ? हे सैरिभेश्वर, मसृणः कर्कशः, 'मसृणः कर्कशे स्निग्धे' इति विश्वः मांसलो मांसभरितः श्यामलो नीलवर्णस्त्वं येषां जनानां दृशां दृष्टीनां पन्थानं मार्गमारोहसि प्राप्नोषि; त इति शेषः । ते इति पूर्वोक्तरीत्या तर्कयन्ति विचारयन्ति । संदेहालंकारः ॥ ४६ ॥

P. P. Ac. Gunratnasuri M.S.                                                    Jin Gun Aaradhak Trust

क्षान्तं क्षान्तमथापि निर्दयममी काष्ठैः करीषैरपि
घ्नन्त्यङ्गेषु जनास्तदेतदखिलं दुःखं क्षमामूलकम् ।
इत्यालोच्य रुषेव सैरिभपते सीराञ्चलेन क्षमा-
मुन्मूल्य प्रसभं करोषि कणशस्तां नीरसस्योचिताम् ॥ ४७ ॥

क्षान्तं क्षान्तमिति । क्षान्तं क्षान्तं क्षान्त्वा क्षान्त्वा स्थितमिति शेषः । अथापि निर्दयं यथा तथा अमी जनाः काष्ठैर्दण्डैः करीषैर्गोमयैः शुष्कैः 'गोविट् गोमयमस्त्रियाम् । तत्तु शुष्कं करीषोऽस्त्री' इत्यमरः । अङ्गेष्ववयवेषु घ्नन्ति ताडयन्ति । तदेतदखिलं सर्वं दुःखं क्षमामूलकं भूमूलकम्; दण्डकरीषादेर्मृण्मयत्वादिति भावः । इत्येवंप्रकारेणालोच्य रुषेव कोपेनेव सीराञ्चलेन हलाग्रेण क्षमां कणशः उन्मूल्य समूलमुत्पाट्य तां क्षमां नीरसस्य रसरहितस्य तृणादेरुचितां योग्यां करोषि कुरुषे । 'मृदुर्हि परिभूयते' इति क्षमाशब्दशक्तिमूलध्वनिः । नीरेण वर्धमानसस्योचितां करोषीति भावः ॥

ये ये भुव्यपमृत्युना बत [1]मृताः पूर्णायुषो जन्तवः
शिष्टेनैव तदायुषाऽतिमहता त्रैलोक्यरक्षाक्षमः ।
आयुर्दीर्घमरोगतामविकलामङ्गेषु पुष्टिं वह-
न्नस्मान्रक्ष लुलायराज नवधान्यानीह निष्पादयन् ॥ ४८ ॥

ये य इति । ये ये पूर्णायुषो दीर्घायुष्परिमाणा जन्तवः भुवि भूलोके अपमृत्युना अकालमृत्युना [2]मृताः मरणं प्राप्ताः । बतेति खेदे । अतिमहताऽतिविस्तृतेन तेषां मृतानां सर्वेषामायुषा आयुःशेषेण त्रैलोक्यस्य भूर्भुवःसुवस्त्रिभुवनस्य रक्षायां क्षमः शक्तः दीर्घं चिरावस्थायि आयुरायुष्यमरोगतां नीरोगतामविकलां समग्रां पुष्टिं देहवृद्धिं च वहन् नवधान्यानि निष्पादयन्, त्वमिति शेषः । हे लुलायप्रभो अस्मान्रक्ष पालय ॥ ४८ ॥

माहात्म्यं तव वर्णये कियदिति स्तुत्युक्तिवर्त्मातिगं
त्वत्कल्याणगुणानुरूपमधिकप्रीत्या ममात्यादरात् ।
अर्थाः शब्दचयाः सदाऽहमहमित्यग्रे स्फुरन्त्यद्भुताः
स्वीकुर्यां कमिव त्यजामि कमिव श्रीमल्लुलायप्रभो ॥ ४९ ॥

माहात्म्यमिति । हे श्रीमन् लुलायप्रभो, इति पूर्वोक्तप्रकारेण वक्ष्यमाणप्रकारेण चेत्यर्थः । तव ते स्तुत्युक्तेः स्तोत्रोक्तेः यद्वर्त्म मार्गस्तदतिगमतिक्रम्य गच्छतीति तादृशं त्वत्कल्याण-

---

1. हताः 2. हताः अपहृताः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गुणानां त्वदीयशोभनगुणानामनुरूपं माहात्म्यं पूज्यत्वं कियद्वर्णयामि । अवाङ्मनसगोचरमहिमशालिनस्तव वर्णनं कर्तुं न शक्यत इत्यर्थः । मम अत्यादरादतिविश्वासात् , अधिकप्रीत्या बहुसंतोषेण । अर्थाः पदार्थाः वाक्यार्थाश्चाद्भुताः श्रेष्ठाः, तथा शब्दचयाः श्लिष्टशब्दसमुदायाः, सदा सर्वकालमहमहमित्यग्रे पुरतः स्फुरन्ति प्रतिभान्ति, कमिवार्थं शब्दं वा स्वीकुर्यामङ्गीकुर्याम् ; कमिव त्यजामि । शब्दार्थानां बहुप्रकारेण प्रतिभासमानानां कृत्स्नवर्णनं दुष्करमिति भावः । तथा च लोकरीत्या पशुप्रायस्य महिषस्य वर्णयितुमशक्यत्वेऽपि स्वप्रतिभाया एतत्प्रबन्धरचनमत्यल्पमिति भावः ॥ ४९ ॥

तिष्ठन्तु क्षितिपा घनान्धतमसप्राग्भारदूरीभव-
त्कृत्याकृत्यविवेकमत्तहृदया नैवाश्रये तानहम् ।
एहि त्वं सरसीतटं तव पुनर्मूर्धाभिषेकं जलै-
रस्मत्संवसथावनाय करवै राजेव संरक्ष माम् ॥ ५० ॥

तिष्ठन्त्विति । घनमेवान्धतमसं गाढान्धकारस्तस्य प्राग्भारेणाधिक्येन दूरीभवन् तिरोभूतो यः कृत्याकृत्यविवेकः सदसद्विवेकः , विहितानुष्ठाननिषिद्धत्यागधीरिति यावत् । तेन मत्तमुन्मत्तं हृदयं चित्तं येषां ते तथोक्ताः, क्षितिपा राजानः तिष्ठन्तु वर्तन्ताम् । तान्मत्तहृदयानहं नैवाश्रये नैवानुसरामि । त्वं सरसीतटं कासारतीरमेह्यागच्छ, तव पुनरस्मत्संवसथस्यास्मद्गृहस्यावनाय रक्षणाय जलैर्मूर्धाभिषेकं करवै करोमि । त्वमित्यनुषङ्गः ; मां राजेव समीचीननृप इव रक्ष पालय ॥ ५० ॥

भूपो भूप इतीव किं न्वनुगता जातिर्घटत्वादिव-
द्भूमावस्ति य एव रक्षति जनान् राजा स एव स्वयम् ।
किं भूमीपतयः शरारव इमे क्रूराः किराता इव
प्रायः सार्वजनीन कासरपते राजा त्वमेवासि नः ॥ ५१ ॥

ननु राजशब्दवाच्यक्षत्रियस्यैव 'राजानमभिषिञ्चति' इत्यभिषेकविधानात्कथं महिषस्य मूर्धाभिषेक इत्यत आह—भूप इति । भूपो भूपः, अयं भूमिपालोऽयं भूमिपाल इत्यनुगता क्षत्रियमात्रानुस्यूता घटत्वादिवद्घटत्वपटत्वादिजातिरिव ; भूपत्वजातिरित्यर्थाल्लभ्यते । भूमौ भूलोके, राजधर्माभिषेकादिप्रयोजकतयेति शेषः । अस्ति किं नु ? वर्तते किम् ? नास्तीत्यर्थः । अनुगतजातिमङ्गीकृत्य तस्यैव राजधर्माभिषेकप्रवृत्तिप्रयोजनकत्वाङ्गीकारे महिषस्य



P. P. Ac. Gunratnasuri M.S.                                  Jin Gun Aaradhak Trust

मूर्धाभिषेकानुपपत्तिः, तस्य 'राजानमभिषिञ्चति' इति शास्त्रान्तर्गतराजशब्दार्थत्वाभावात्। किं त्वन्यदेव प्रजापालनादि राजधर्मप्रयोजकम्; तदेव राजपदप्रवृत्तिनिमित्तमपीति महिषस्यापि मूर्धाभिषेको युज्यत एवेति भावः। तदेवाह—य इति। य एव जनाँल्लोकान् रक्षति पालयति स स्वयं राजा भवतीति शेषः। रूढेर्योगानाक्रान्तविषयत्वादिति भावः। मनुष्यजातीयस्य राजशब्दार्थत्वं न संभवतीति मत्वाऽऽह—किमिति। किराता निषादा इव क्रूराः कठिनचित्ताः शरारवो घातुकाः 'शरारुर्घातुको हिंस्रः' इत्यमरः। इमे दृश्यमाना भूमीपतयः भूपाः किमित्यर्थः। सार्वजनीन सर्वोपकारक, हे कासरपते! त्वमेव नोऽस्माकं राजाऽसि। मनुष्यजातीयानां रक्षकत्वरूपयोगानाक्रान्तत्वादिति भावः। अत्र मीमांसकाः—राजपदं न प्रजापालनप्रवृत्तिनिमित्तकम्। किं तु क्षत्रियत्वजातिनिमित्तकमेव, प्रजापालनस्याभिषेकोत्तरभावित्वेनाभिषेकविधावेव 'राजानमभिषिञ्चति' इति राजशब्दप्रयोगात्। तस्य कर्मणीत्यधिकृत्य 'पत्यन्तपुरोहितादिभ्यो यक्' इति स्मृत्या पुरोहितादिगणपठिताद्राजशब्दाद्यगादिविधानेन राज्यशब्दस्य राजशब्दप्रसिद्धिपूर्वकत्वावगतेर्द्वैविध्यप्रयोगाच्च राजशब्दः क्षत्रियवचन एव। निर्णीतं चेदं भेदलक्षणे तृतीयचरणे 'अवेष्टौ यज्ञसंयोगात्' इत्यधिकरणे श्रीमदाचार्यशबरस्वामिभिरिति कथं राजशब्दस्य प्रजापालननिमित्तकत्वं कविनाऽभ्यधायीति वदन्ति। अत्र ब्रूमः, राजशब्दस्य क्षत्रियपरत्वेन तदधिकरणे निर्णीतत्वेऽपि 'राजानमभिषिञ्चति' इत्यादिना विधीयमानराजधर्मप्रवृत्तौ प्रजापालनमेव निमित्तम्, न तु जातिः, क्षत्रियमात्रस्याभिषेकादिधर्मप्रसक्त्यापत्तेः। न चाधिकरणविरोधः। 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र राजशब्दस्य प्रजापालनयुक्तक्षत्रियपरत्वस्यैव तदधिकरणनिर्णीतत्वेन तदधिकरणे योगपरित्यागाभावात्। अस्तु वा तदधिकरणे योगपरित्यागः, तथाऽभिषेकादि; मिताक्षरायां 'व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह' ... सभासदः कार्याः, अदण्ड्यान्दण्डयन्राजा' इत्यादौ क्षत्रियादन्योऽपि राज्याधिकारं कुर्वन्नेतादृशधर्मेऽधिक्रियत इति स्पष्टमेव प्रजापालनस्यैव तद्धर्मव्यवहारपरिच्छेदादिनिमित्तत्वमभिहितमित्यन्यत्र विस्तरः॥ ५१॥

सानन्दं महिषीशतं रमयसे मूर्धाभिषिक्तोऽन्वहं
त्वं वालव्यजनातपत्रधृतिमसकृत्प्राप्नोषि शृङ्गान्वितः।
किं च त्वां प्रकृतिर्न मुञ्चति तृणप्रायं जगत्पश्यसि
स्वस्ति श्रीमहिषेन्द्र तेऽस्तु नियतं राजा त्वमेवासि नः॥ ५२॥

सानन्दमिति। हे महिषेन्द्र ते तव नियतं सार्वकालं स्वस्त्यस्तु शोभनं भवतु। महिषस्याशीःप्रार्थनायां हेतुमाह—राजा त्वमेवासि न इति। नोऽस्माकं त्वमेव राजाऽसि;

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नान्यो मनुष्यजातीय इत्यवधारणार्थः; पूर्वश्लोकेनैव निराकृतत्वादिति भावः। तथा च राजलक्षणयुक्तत्वान्महिषस्याशीःप्रार्थनं युक्तमित्याशयः। कथं महिषे राजलक्षणम्? तत्राह—सानन्दमिति। आनन्देन सहितं यथा भवति तथा महिषीणां शतम्, शतमित्युपलक्षणम्, सहस्रमयुतं वेति बोद्धव्यम्। रमयसे क्रीडयसे। अन्वहं प्रत्यहं मूर्ध्नि शिरसि अभिषिक्तः स्नपितः, वालमेव व्यजनम्, तस्यावधूतिं चालनम्, असकृत्पुनः पुनः प्राप्नोषि। शृङ्गाभ्यां विषाणाभ्यामन्वितो युक्तः। किं च स्वां प्रकृतिं स्वकीयं जाड्यादिस्वभावं न मुञ्चसि न त्यजसि। तृणप्रायं तृणप्रचुरं जगत्पश्यसि ईक्षसे; भक्षणार्थमिति भावः। 'प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु' इत्यमरः। राजपक्षे—महिषीणां कृताभिषेकाणां स्त्रीणाम्; 'कृताभिषेका महिषी' इत्यमरः। शते सहस्रे वा परिगणिते रमयसे। अन्तःपुरस्त्रियः यथा संभोगादिना तुष्यन्ति, तथा कलाशास्त्रोक्तप्रकारेण तासां प्रीत्यतिशयं जनयति। 'मूर्धाभिषिक्तो राजन्यः' इत्यमरः। वालं चामरं व्यजनं तालवृन्तादिकं तयोरवधूतिम्; शृङ्गेण प्रभुत्वेनान्वितः; 'शृङ्गं प्रभुत्वे' इति विश्वः। स्वां प्रकृतिं स्वकीयराज्याङ्गं स्वाम्यमात्यादिकम्; 'राज्याङ्गानि प्रकृतयः' इत्यमरः। जगद्भुवनं तृणप्रायं तृणसदृशं यथा भवति तथा पश्यति। जनेष्वैश्वर्याद्यल्पत्वेन तत्र राज्ञस्तृणबुद्धिर्भवतीत्यर्थः। अत्र स्वस्त्यस्त्वित्याशिषं प्रति राजत्वस्य हेतुत्वेन हेतुमता साकं हेतुवर्णनाद्धेत्वलंकारः। त्वमेव राजाऽसीत्यत्र रूपकालंकारः। रूपकस्य चैवकारेणान्यत्र मनुष्ये राजत्वस्यापह्नवादपह्नुत्यलंकारः। तयोरङ्गाङ्गिभावेन सङ्करोऽप्यलंकारः। रूपकविधया प्रतीतस्य राजत्वस्य सानन्दमित्यादिभिः समर्थनात्काव्यलिङ्गमलंकारः। तस्य च श्लेषोत्थापितत्वाच्छ्लेषालंकारः। शतसंख्यायामुपलक्षणत्वेनासकृदन्वहमित्यादिपदैर्महिषस्याधिक्यप्रतीतेर्विशेषालंकारो व्यज्यते। सानन्दमन्वहमिति मकारानुप्रासात्मकः शब्दालंकारः। एवं माधुर्यादेर्गुणस्यापि प्रतीतिर्बोध्या। तथा च —'काव्यं ह्यदुष्टौ सगुणौ शब्दार्थौ सदलंकृती' इति काव्यलक्षणम्, 'वाच्यातिशायि व्यङ्ग्यं यदुत्तमं तद्ध्वनिश्च सः' इत्युत्तमकाव्यलक्षणमिति काव्यप्रकाशोक्तं स्फुटतरमिति संक्षेपः॥ ५२॥

धात्र्युत्सङ्गतले विमुञ्चसि मुहुर्विण्मूत्रमस्तत्रपं
धत्से नाप्यपलालमास्यमनिशं स्नेहेन संवर्द्धयसे।
शङ्क्याऽपि पयः पिबस्यनुदिनं तस्माददन्तं मुखे
वत्स श्रीमहिषेन्द्र बालकमिव त्वां वीक्ष्य नन्दाम्यहम्॥ ५३॥

धात्रीति। वत्स श्रीमहिषेन्द्र बालकमिव स्थितं त्वां वीक्ष्य अहं नन्दामि संतुष्यामि। कथं बालकसादृश्यम्? तत्राह—धात्र्याः क्षितेरुत्सङ्गतले अङ्कप्रदेशे; अनेन गृहमध्यप्रदेशो लक्ष्यते।

P. P. Ac. Gunratnasuri M.S.                    Jin Gun Aaradhak Trust

विण्मूत्रं विष्ठामूत्रम्, अस्ता नष्टा त्रपा लज्जा यस्मिन्कर्मणि यथा भवति तथा विमुञ्चसि त्यजसि। न विद्यते पलालं यस्मिंस्तदपलालमास्यं न धत्से। अपि तु पलालसहितमेवास्यं धत्स इत्यर्थः, 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायात्। 'पलालोऽस्त्री स निष्फलः' इत्यमरः। स्नेहेन प्रीत्या संवर्द्धयसे। शङ्खिन्यापि ललाटास्थिन्यापि 'शङ्खो निधौ ललाटास्थ्नि' इत्यमरः। पयः जलमनुदिनं प्रतिदिनं पिबसि। 'पयः क्षीरं पयोऽम्बु च' इत्युभयत्राप्यमरः। मुखे अदन्तं भक्षयन्तम्। बालकपक्षे धात्र्या उपमातुः; 'धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपि' इत्यमरः। अपगता लाला यस्मादपलालम्, 'सृणिका स्यन्दिनी लाला' इत्यमरः। स्नेहेन तैलेन प्रत्यहं तैलाभ्यङ्गादिना संवर्ध्यसे। शङ्खिन्यापि कम्बुन्याप्तम्। शङ्खो निध्यन्तरे कम्बुललाटास्थि....' इति विश्वः। पयः क्षीरम्। मुखे अदन्तं दन्तरहितम्। अत्र बालकमिवेत्युपमया श्लेषोज्जीवितवाक्यार्थैः समर्थनाच्छ्लेषकाव्यलिङ्गोपमानानामङ्गाङ्गिभावेन सङ्करोऽलंकारः॥ ५३॥

> भूषे त्वं विविधस्वरान्बहुविधान्काण्डांश्च धत्से मुखे
> प्राप्तश्चाध्ययनं पदक्रमविधिं किं चोच्चरन्गच्छसि।
> अङ्गेषु श्रममादधासि बहुधा वृत्तिं करोष्यन्वहं
> तत्सत्यं महिषाधिराज सततं वेदावधानीव नः॥ ५४॥

भूष इति। हे महिषाधिराज सततं सर्वदा वेदावधानीव वेदावधानवानिव नोऽस्माकं भासि। कथं वेदावधानीत्यत्राह—भूष इति। विविधस्वरान् मध्यमादिध्वनिभेदान्; 'मध्यमादिषु च ध्वनौ', 'उदात्तादिष्वपि प्रोक्तः स्वरः' इत्युभयत्रापि विश्वः। बहुविधाननेकप्रकारान् काण्डान् जलभेदान्; 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः। मुखे धत्से। अयनमधि अध्ययनम्, मार्गमध्य इत्यर्थः। 'अयनं वर्त्ममार्गाध्व' इत्यमरः। पदानां क्रमविधिं निक्षेपविधिं प्राप्तः। किं चोच्चरन् मूत्रयन् गच्छसि। मूत्रं प्रस्राव उच्चारः' इत्यमरः। अङ्गेष्ववयवेषु, 'अङ्गं प्रतीकोऽवयवः' इत्यमरः। श्रमं खेदमादधासि बिभर्षि। बहुधा बहुप्रकारेण वृत्तिं जीवनम्; 'वृत्तिर्वर्तनजीवने' इत्यमरः। अन्वहं प्रत्यहं करोषि। वेदावधानिपक्षे- विविधस्वरानुदात्तादिस्वरान्, काण्डान्वर्गान्; 'काण्डं वर्गेऽप्युदाहृतम्' इति विश्वः। अध्ययनं वेदम्, अध्ययनाध्येययोरनतिभेदात्। पदक्रमविधिं पदक्रमयोर्विधिमध्ययनरूपम्, संहितापदक्रमानिति यावत्। प्राप्तः, उच्चरन्नुच्चारणं कुर्वन्। अर्थाद्वेदस्य अङ्गेषु शिक्षाव्याकरणादिषु; 'शिक्षा व्याकरणं छन्दः' इत्यमरः। तथा आवृत्तिमिति भेदः। अत्रापि वेदस्येत्यनुषङ्गः। अत्रापि पूर्ववदलंकारः॥ ५४॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुद्राधारणदग्धचर्मकतया [1]दृश्यैः किणैरङ्कितो
मध्याह्नात्परमेव मज्जसि जले सानन्दतीर्थादरः ।
शान्ताङ्गाररुचिं बिभर्षि च तनौ तिष्ठन्मते दण्डिनो
मध्वाचार्यमिवाधुनाऽनुकुरुषे श्रीमल्लुँलायप्रभो ॥ ५५ ॥

मुद्रेति । श्रीमल्लुँलायप्रभो मध्वानामाचार्यं गुरुमनुकुरुष इव; कथं ? तत्राह—मुद्रायाः प्रत्ययकारिचिह्नात्मिकाया धारणेन दग्धं चर्म यस्य स तादृशः तस्य भावो मुद्राधारणदग्धचर्मकता तया; 'मुद्रा प्रत्ययकारिणी' इति विश्वः । [2]दृश्यैः दृश्यमानैः किणैः व्रणसंजातचर्मविशेषैरङ्कितः; मध्याह्नात्परमेव मध्याह्नादनन्तरमेव जले मज्जसि; प्रातःकाले कृष्यादिकार्यव्यापृतत्वेन तदानीं जलावगाहनासंभवात् । सानन्दं यथा भवति तथा तीर्थे आदरो यस्य सः तथाभूतः, तनौ शरीरे शान्ताङ्गाररुचिं शान्ताग्निकोल्काकान्तिं बिभर्षि । दण्डिनो दण्डवतः, मते वने तिष्ठन् । अन्यत्र—मुद्राधारणेन तप्तमुद्राधारणेन । मध्याह्नात्परमेव जले मज्जति; मध्वानां वैदिकमार्गबहिष्कृतानां प्रायेण वेदाध्ययनाभावेन शुष्कतार्किकाणां तेषां प्रातःस्नानाभावस्य सर्वलोकप्रसिद्धत्वात् । आनन्दतीर्थ इति मध्वगुरुस्तस्मिन्नादर आनन्दतीर्थादरः तेन सह वर्तेत इति सानन्दतीर्थादरः । शान्ताङ्गारेण रुचिं कान्तिं बिभर्ति । दण्डिनः संन्यासिनो मते तिष्ठन्; तन्मते सुमतीन्द्रादिमठभेदेनैकादश्याद्युपवासस्य भेददर्शनात् । अत्रापि पूर्ववदलंकारः ॥ ५५ ॥

त्वं वाचंयमतां दधासि सहसे शीतातपौ निश्चलः
किं चिन्नैव च याचसे भुवि यथाजातात्मना तिष्ठसि ।
प्राणाकर्षकृता यमेन नियमेनारूढ एवासि च
प्रायः कासरसार्वभौम नितरां योगीव संदृश्यसे ॥ ५६ ॥

त्वमिति । हे कासर महिष नितरामत्यन्तं महायोगीव संदृश्यसे । कथं योगिसादृश्यम् ? तत्राह—त्वं वाचंयमतां मौनित्वं दधासि; शीतातपौ शीतोष्णौ निश्चलः सन् सहसे । किंचिदप्यभिलषितं नैव याचसे । भुवि भूमौ यथाजातात्मना यथाजातरूपेण; 'अव्ययं विभक्ति—' इत्यादिनाऽव्ययीभावः । जननकाले यादृशो दिगम्बरत्वादियुक्तस्तादृशवेषेणेति यावत् । तिष्ठसि । प्राणानां प्राणवायूनामाकर्षणं देहान्निःसरणं करोतीति प्राणाकर्षकृत्; तेन यमेन धर्मराजेन नियमेनारूढः; कृतान्तस्य महिषवाहनत्वात् । योगिपक्षे वाचंयमतां मौनिताम्; निदिध्यासनात्मकं

---

1, स्पष्टैः 2. स्पष्टैः व्यक्तैः अत एव दृश्यैः किणैः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मौनमित्यर्थः । तथा च कहोलब्राह्मणम्—‘तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः’ इति । सहसे शीतातपौ निश्चल इत्यनेन द्वंद्वसहिष्णुता । तथा च भगवद्गीतायाम्—‘शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः’ इति । किंचिदेव च याचस इत्यत्रापरिग्रहरूपो यमोऽभिहितः । तथा च योगभाष्ये—‘विषयाणामार्जनरक्षणक्षयसङ्ग-हिंसादिदोषदर्शनादस्वीकरणमपरिग्रहः’ इति । भुवि यथाजातात्मनेत्यत्र परमहंसाश्रमरूपावधूत-चर्योच्यते । प्राणानां प्राणवायूनामाकर्षकृता निरोधकृता; प्राणायामेनेत्यर्थः । यमेनाहिंसादिना, नियमेन शौचादिनारूढः । योगस्य [1]यमनियमाद्यष्टाङ्गोपेतत्वात् । अत्र योगपातञ्जले व्यासचरण-भाष्यकृतः—‘यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि’ इति । यमा-दिस्वरूपमपि तत्रैव वर्णितम् । ‘अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहा यमाः’ ‘शौचसंतोषतपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः’ । तत्र ‘स्थिरसुखमासनम्’ तद्यथा—पद्मासनम्, वीरासनम्, भद्रासनमित्यादि । ‘तस्मिन्सति निःश्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः । सत्यासने बाह्यस्य वायोराचमनं निःश्वासः । कोष्ठस्थवायोर्निःसारणं प्रश्वासः । तयोर्गतिविच्छेदः उभयाभावः प्राणायामः इति ॥ ५६ ॥

घत्से शृङ्गयुगं प्रतप्तमभितो [2]गात्रे च चक्राङ्कनं
श्रीरामानुजमण्डलस्य सदृशं चिह्नं च धत्से मुखे ।
[3]पङ्क्तीभूय निजप्रबन्धसमये क्रन्दस्यमन्दारवं
[4]नूनं श्रीमहिषाधिराज भवसि श्रीवैष्णवाग्रेसरः ॥ ५७ ॥

धत्स इति । तत्तस्मात्कारणात् हे श्रीमहिषाधिराज, श्रीवैष्णवाग्रेसरः श्रीवैष्णवश्रेष्ठो भवसि [5]नूनमिति संबन्धः । कस्मादित्याह—शृङ्गयुगं विषाणयुग्मं धत्से वहसि । प्रकर्षेण तप्तमभितः परितो [6]गात्रे देहे चक्रवदङ्कनं चिह्नं धत्स इत्यनुषङ्गः । रोगादिपरिहारार्थं महिषाणां गवां च अङ्गे शूलचक्रार्धचन्द्राद्याकारं चिह्नं तप्तायसशलाकया कुर्वन्ति कृषीवलाः । श्रीरामानुजमण्डलस्य श्रीरूपिणी या रामा तस्या अनुजश्चन्द्रः, तस्य यन्मण्डलं बिम्बं तत्सदृशं चिह्नं मुखे धत्से । श्वेतवर्तुलावर्त-शोभितललाटयुक्तस्य महिषस्य कृष्यादौ प्रशस्तत्वेन कृषीवलसंप्रदायो बोध्यः । [7]पङ्क्तीभूय पङ्क्तिस्थो भूत्वा निजस्य स्वस्य प्रकर्षेण बन्धो बन्धनं तस्य समये काले अमन्दारवमधिकशब्दं यथा भवति तथा

1. यमाद्यष्टाङ्गनियतत्वात् 2. देहे 3. श्रेणीभूय 4. सत्यं 5. सत्यमिति निश्चयार्थे । कथ-मित्यत आह— 6. देहे स्वीयदेहे 7. श्रेणीभूय एकीभूय.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्रन्दस्युद्घोषयासि । वैष्णवपक्षे—शृङ्गयुगं शृङ्गसदृशरेखाद्वयम्; 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके' इति विश्वः । अभित उभयत्र भुजद्वयेऽपि प्रतप्तं चक्राङ्कनम्; तेषां तप्तमुद्राङ्कनस्य पाञ्चरात्राद्यागमसिद्धत्वादिति भावः । श्रीरामानुजमण्डलस्य रामानुजसंबन्धिमण्डलस्य समूहस्य सदृशं योग्यं चिह्नं ललाटादौ मृत्तिकालेपादिकम् । निजप्रबन्धसमये स्वस्य द्राविडप्रबन्धस्य नालायिरप्रबन्धस्येति यावत् । वाचनसमये देवोत्सवादिवेलायां श्रेणीभूय अमन्दारवं अधिकरवं यथा क्रन्दन्वे ॥ ५७ ॥

शृङ्गाग्रेण मुहुर्मुहुर्निजतनुं कण्डूयसे मौनवान्
प्राग्वंशोपहितां प्रविश्य विपुलां शालां महिष्या समम् ।
अन्तास्तिष्ठसि धूलिधूसरतनुः कृष्णाजिनाच्छादित-
स्तन्मे भासि लुलाय दीक्षित इव त्वं वाजिमेधक्रतौ ॥ ५८ ॥

शृङ्गेति । शृङ्गाग्रेण विषाणाग्रेण मुहुर्मुहुर्वारं वारं निजतनुं स्वकीयदेहं कण्डूयसे । मौनवान् प्राग्वंशोपहितां प्राचीनाग्रवंशनिर्मितां विपुलां विस्तृतां शालां गोष्ठरूपां महिष्या समं प्रविश्यान्तस्तिष्ठसि । प्रागग्रैर्वंशैर्गोष्ठनिर्माणे पश्वादिवृद्धिरिति शिल्पशास्त्रात्; धूलिभी रेणुभिर्धूसरा रूक्षा तनुर्यस्य स तादृशः, सर्वदा कृष्यादावेव व्यापृतत्वात् । कृष्णेन नीलेन अजिनेन चर्मणा आच्छादितस्तस्माद्धेतोः; हे लुलाय, वाजिमेधक्रतौ अश्वमेधे अश्वबध इत्यर्थः । दीक्षित इवोत्पुक इव भासि, महिषस्य वाहद्विट्त्वात् । दीक्षितपक्षे— शृङ्गाग्रेण कृष्णविषाणाग्रेण, 'कृष्णविषाणया कण्डूयते' इति श्रुतेः । मौनवान्; 'मुष्टीकरोति वाचं यच्छति' इति श्रुतेः । प्राग्वंशेन प्राग्वंशसंज्ञिकशालामुखायेन; 'प्राग्वंशः प्राग्घविर्गेहात्' इत्यमरः । महिष्या कृताभिषेकया, अश्वमेधे राज्ञ एवाधिकारात् । धूलिधूसरतनुः अवभृथपर्यन्तं दीक्षितस्य स्नाननिषेधात् । कृष्णाजिनेनाच्छादितः; 'अजिनेन दीक्षयति' इत्यनेन कृष्णाजिनस्य विहितत्वात् ॥ ५८ ॥

ग्राह्योऽसि श्रवणादिभिः परिचयात्तत्त्वावमर्शे कृते
मत्यज्ञानमयोऽसि किं च बृहदारण्यान्तरे दृश्यसे ।
प्रत्यक्षीक्रियसे च योगिभिरखण्डाकारवृत्त्या स्वयं
तस्मात्पुच्छमयं लुलाय परमं ब्रह्म त्वमेवासि नः ॥ ५९ ॥

ग्राह्योऽसीति । श्रवणादिभिः श्रोत्रादिभिः परिचयाद्ग्राह्यः हस्तेन ग्रहीतुं योग्यः । कर्षका हि चिरपरिचयेन कर्णे गृहीत्वा पशून् लाङ्गलेषु बध्नन्तो दृश्यन्ते । तत्त्वस्य महिषस्वरूपस्य

P. P. Ac. Gunratnasuri M.S.                                                Jin Gun Aaradhak Trust

अवमर्शे विचारे कृते सत्यज्ञानमयोऽसि अज्ञानविकारोऽसि । किं च, बृहदारण्यान्तरे महति वनान्तरे दृश्यसे । योगिभिरुपायज्ञैः ; 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । कर्षकैरिति शेषः । अखण्डाकारया महत्त्वरूपया वृत्त्या जीवनेन ; 'वृत्तिर्वर्तनजीवने' इत्यमरः । प्रत्यक्षीक्रियसे, महिषदर्शनस्य कृष्येकप्रयोजनत्वादिति भावः । तस्मात्कारणात् पुच्छमयं पुच्छस्वरूपं ब्रह्म त्वमेवासीति योजना । ब्रह्मपक्षे तु — श्रवणादिभिः श्रवणमनननिदिध्यासनैः साधनैर्ग्राह्यं ग्रहीतुं योग्यम् । श्रवणं नाम वेदान्तानां ब्रह्मणि तात्पर्यनिर्णयानुकूलमानसव्यापारः । मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलितर्कात्मकज्ञानजनको मनोव्यापारः । निदिध्यासनं नाम अनादिदुर्वासनाकलुषितस्य चित्तस्य दुर्विषयेषु स्वच्छन्देन प्रवर्तमानस्य तत आच्छिद्यात्मैकतानतासंपादनानुकूलो मानसव्यापारः । न च मननादीनामेव ज्ञानरूपतया प्रसिद्धत्वेन तज्जन्यग्रहविषयत्वोक्तिरसंगतेति वाच्यम् । श्रवणादीनां ज्ञानरूपत्वे ज्ञानस्यापुरुषतन्त्रतया विधेयत्वाभावेन मन्तव्य इत्यादिविधायकतव्यप्रत्ययानुपपत्तेः । तथा हि— प्रवर्तनारूपो हि विधिः तव्यप्रत्ययार्थः ; प्रवर्तना च प्रवृत्तिफलको व्यापारः ; प्रवृत्तिश्च कृतिरूपा ; तथा च कृत्यसाध्ये चन्द्रमण्डलाहरणादौ प्रवृत्तिप्रवर्तनयोरभावेन चन्द्रमण्डलमाहर्तव्यमिति विधिप्रत्ययो लोकवेदयोर्न प्रयुज्यते । प्रकृते च श्रवणादेर्ज्ञानरूपत्वे 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति विधिप्रत्ययानुपपत्तिः । तथा च बृहदारण्यके मैत्रेयीब्राह्मणम्— 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति । अतः श्रवणादेर्ज्ञानरूपतानुपपत्तेः श्रवणादिजन्यग्रहविषय इति युक्तमेव । ननु तर्हि दर्शनस्यापि ज्ञानत्वं न स्यात्, द्रष्टव्य इति विधिप्रत्ययश्रवणादिति चेत् ; न, तत्र द्रष्टव्य इत्यस्योद्देश्यपरत्वेन विधेयपरत्वाभावात् । निर्णीतं चेदं शारीरकभाष्यादौ आचार्यश्रीभगवत्पादैः । तथा च श्रवणादिभिः करणभूतैः संपादितग्रहविषयत्वात्, ग्राह्योऽसि श्रवणादिभिरित्युपपन्नतरमित्यन्यत्र विस्तरः । अत्र श्रवणादिभिर्ग्राह्य इत्युक्त्या शास्त्रयोनित्वादित्यधिकरणे 'तं त्वौपनिषदम्' 'नावेदविन्मनुते' इत्यादिश्रुत्या ब्रह्मणो वेदैकगम्यत्वं निर्णीतमपि सूचितम् । परिचयादभ्यासात्तत्त्वावमर्शे तत्त्वस्य महावाक्यान्तर्गततत्पदलक्ष्यत्वोपलक्षितपरमात्मस्वरूपस्य ; 'तत्त्वं वाद्यप्रभेदे स्यात्स्वरूपे परमात्मनि' इति विश्वः । अवमर्शे विचारे क्रियमाणे सत्यज्ञानमयं ब्रह्म प्रतीयते ; उपक्रमादिषड्विधतात्पर्यलिङ्गैर्वेदान्तानां निरस्तसमस्तभेदसच्चिदानन्दात्मकब्रह्मपरत्वेन महावाक्यानां निर्णीतत्वात् । यद्वा तत्त्वस्य वस्तुतत्त्वस्य परमात्मरूपस्येत्यर्थः ; अवमर्शे विचारे कृते सत्यज्ञानमयं ब्रह्म ; न तु नैयायिकादिमत इव ज्ञानाद्यधिकरणमिति भावः । न च ग्राह्योऽसि श्रवणादिभिरित्यनेनैवास्यार्थस्य सिद्धत्वात्पुनः परिचयादित्युक्तिर्व्यर्थेति वाच्यम् । तस्य श्रवणाद्यभ्यासपरत्वात् । तदभ्यासेनैव सत्यज्ञानानन्दात्मकब्रह्मात्मताविबोधस्य जायमानत्वात् । निर्णीतं चेदम् 'आवृत्तिरसकृदुपदेशात्'

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्वाविकरणे श्रीभाष्यकारचरणैः। बृहदारण्यान्तरे बृहदारण्याख्यमहोपनिषन्मध्ये दृश्यसे। न च सर्वेषां वेदान्तानामद्वितीयब्रह्मपरत्वाद्बृहदारण्यान्तर इति विशेषग्रहणे प्रमाणं नास्तीति वाच्यम्। ब्रह्मविद्याया वार्तिकान्तत्वप्रसिद्ध्या महावार्तिकस्य तदुपरि प्रवृत्तत्वेनोत्तरमीमांसादौ बहुशस्तद्वाक्यस्यैवोदाहरणत्वेन, पञ्चमषष्ठाध्याययोः जल्पवादकथाभ्यामद्वितीयब्रह्मनिरूपणेन च विशिष्य ग्रहणौचित्यात्। योगिभिः सनकादिभिः अखण्डाकारवृत्त्या प्रातिपदिकार्थमात्रविषयकवृत्त्या प्रत्यक्षीक्रियते। यद्वा, संसर्गानवगाहिन्या वृत्त्या प्रत्यक्षीक्रियते। तदुक्तमाकरे— 'संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्। उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ॥' इति। प्रातिपदिकार्थमात्रपरत्वमखण्डार्थत्वमिति चतुर्थपादार्थः। महावाक्यजन्यवृत्तेर्निर्विकल्पकरूपत्वेन सिद्धान्तसिद्धतया संसर्गानवगाहित्वस्य प्रातिपदिकार्थमात्रपरत्वस्य च युक्तत्वादिति भावः। पुच्छमयमाधारस्वरूपम्, पुच्छशब्देनाधारलक्षणात्। अनेन वृत्तिकाराभिमतानन्दमयत्वनिराकरणेन पुच्छब्रह्मज्ञानमेव मोक्षहेतुरिति भाष्यकारसिद्धान्तः सूचितः। अत्र प्रसङ्गाच्छिष्यानुजिघृक्षया महावाक्यसमानाकारं वाक्यं प्रयुङ्क्ते—'परमं ब्रह्म त्वमेवासि' इति। तत्र ब्रह्मपदवाच्यस्य विभुत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणादिविशिष्टेनैक्यायोगादैक्यप्रतीतिनिर्वाहाय चिन्मात्रलक्षणया तद्विषयकनिर्विकल्पकात्मकः शाब्दबोध इति प्राञ्चः। अन्ये तु—शब्दजन्यसप्रकारकबोधजनितचिन्मात्रगोचरो मानसः साक्षात्कारो मोक्षहेतुः। पदद्वयबोध्यकिंचिज्ज्ञत्वसर्वज्ञत्वयोरैक्यासंभवेऽपि पदद्वयजन्यप्रतीतिविशेष्यीभूतपदार्थद्वयानुगतचैतन्याभेदसंभवमात्रेणैव सामानाधिकरण्योपपत्तेर्न लक्षणेति वदन्ति। सर्वथाऽपि 'परमं ब्रह्म त्वमेवासि नः' इत्यनेन महावाक्यार्थबोधसंभवात् तद्द्वारा परमपुरुषार्थप्राप्तिरेतद्ग्रन्थाध्ययनप्रयोजनमिति सुधीभिर्विभावनीयम् ॥ ५९ ॥

[1]गोत्रोद्भेदनकौशलं प्रथयसे हल्यागलालिङ्गनं
प्रत्यूषे कुरुषे सकुक्कुटरवे बह्वप्सरःस्वादतः।
स्वस्थाने मुदितः स्वरूपगतया युक्तः श्रिया मद्गृहे
गोष्ठे तिष्ठ लुलायराज महतीं देवेन्द्रलक्ष्मीं वहन् ॥ ६० ॥

गोत्रेति। गोत्रायाः पृथिव्या उद्भेदने विदारणे कौशलं सामर्थ्यं प्रथयसे विस्तारयसि; 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः। प्रत्यूषे प्रभाते सकुक्कुटरवे ताम्रचूडध्वनियुक्ते सति हलानां समूहः हल्या; 'पाशादिभ्यो यः' इति समूहार्थे यप्रत्ययः। तया गले कण्ठे आलिङ्गनमाश्लेषं कुरुषे। बह्वप्सरःस्वादतः बह्वयः आपो येषु तानि तथोक्तानि, तानि च तानि सरांसि च तेभ्यः स्वादः। यद्वा, अद्भिर्युक्तानि सरांसि अप्सरांसि बहूनि च तान्यप्सरांसि चेति विग्रहः। एवं च

1. गोत्रोच्छेदन०

M. S. 5.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समासान्तस्यानित्यत्वकल्पनाद्दोषोऽपि निरस्तः । स्वस्थाने स्वाश्रमस्थाने करीषकर्दमादियुक्तेऽपि मुदितः संतुष्टः । स्वस्य रूपेण स्वभावेन, 'रूपं स्वभावे सौन्दर्ये' इति विश्वः । गतया प्राप्तया श्रिया संपदा युक्तो विशिष्टः । हे लुलायराज त्वं महतीं विपुलां देवेन्द्रलक्ष्मीं वहन्सन् मद्गृहे गोष्ठे विश । इन्द्रपक्षे—गोत्रस्य पर्वतस्य; 'अद्रिगोत्रगिरिग्रावा' इत्यमरः । अहल्यागलालिङ्गनमिति छेदः । इन्द्रो हि प्रभातसमये गौतमवेषेण गौतमाश्रमं प्रविश्याहल्यां भुक्त्वा गौतमेन शप्त इति श्रुतिस्मृतिपुराणादिषु प्रसिद्धिः । बह्वयश्च ता अप्सरसः रम्भाप्रभृतयस्तासु । स्वस्थाने स्वर्गस्थाने; 'स्वरव्ययं स्वर्गनाक....' इत्यमरः । स्वरुणा वज्रायुधेन; 'शतकोटिः स्वरुः शंबः' इत्यमरः ॥ ६० ॥

नित्यं धीरमनांसि कर्षसि सदा रत्यां समुत्साहवा-
न्मुग्धानामुपमाऽसि मासि तपसि ज्याकर्षणेनोज्झितः ।
सामर्थ्यं विषमेषु कर्मसु भजन्नग्रे वसन्तं स्पृश-
न्सत्यं श्रीमहिषेन्द्र मन्मथ इव [1]प्रत्यक्षमालक्ष्यसे ॥ ६१ ॥

नित्यमिति । नित्यं प्रत्यहं धीरं यथा तथा अनांसि शकटानि, 'अनः शकटमस्त्रियाम्' इत्यमरः । कर्षसि आकर्षसि । सदा सर्वकाले रत्यां क्रीडायां समुत्साहवान् प्रीतिमान् । मुग्धानां मूढानामुपमाऽसि दृष्टान्तोऽसि । उपमापदेन सादृश्यप्रतियोगी लक्ष्यते । 'मुग्धः सुन्दरमूढयोः' इत्यमरः । मासि तपसि माघमासे; 'तपा माघे' इत्यमरः । ज्यायाः भूमेः; 'क्षोणी ज्या काश्यपी क्षितिः' इत्यमरः । कर्षणेन विलेखनेन उज्झितस्त्यक्तः; तदानीं कृष्यारम्भाभावात् । विषमेषु निन्दितेषु कर्मसु; अभक्ष्यभक्षणादिष्वित्यर्थः । सामर्थ्यं भजन् अग्रे पुरतः वसन्तं वर्तमानं स्पृशन् घर्षयन् हे महिषेन्द्र त्वं [2]मन्मथ इव प्रत्यक्षमालक्ष्यसे । मन्मथपक्षे— धीराणां योगिनां मनांसि चित्तानि कर्षसि क्षोभयसि । रत्यां स्वीयभार्यायाम्; मुग्धानां सुन्दराणाम्; तपोमासि ज्याकर्षणे मौर्वीविकर्षणे, 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । नोज्झितः न त्यक्तवान् । 'उज्झ विसर्गे' इत्यस्माद्धातोर्भावे क्तप्रत्यये अर्श आद्यच्प्रत्ययः । तथा च ज्याकर्षणं नोज्झितवानित्यर्थः, पीता गावो भुक्ता ब्राह्मणा इति महाभाष्यानुसारात् । यद्वा, उज्झितं त्यागः, न विद्यते उज्झितं यस्य नोज्झितः । न च नलोपः शङ्क्यः, नशब्दसमासाङ्गीकारेण नलोपाप्रसक्तेरिति दिक् । विषमाः पञ्चसंख्याकाः ये इषवो बाणास्तेषां कर्मसु संधानादिषु; अग्रे वसन्तं वसन्ताख्यऋतुम् ॥ ६१ ॥

मूर्तिं हन्त बिभर्षि नीलमसृणां नित्याभिषिक्तां नरै-
र्ग्राह्यः पञ्चपचक्रतः कलयसि त्वं बन्धमोक्षावपि ।

---

1. प्रत्यक्षमाभासि मे 2. मे मम नेत्रयोः मन्मथ इव अनङ्ग इव प्रत्यक्षमाभासि दृश्यसे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुक्षेत्रश्रियमादधासि महताज्ञानेन पूज्योऽसि त-
त्सालग्राम इवावभासि नियतं श्रीकासराधीश्वर ॥ ६२ ॥

मूर्तिमिति । नीलां कृष्णां मसृणां कर्कशाम्, 'मसृणः कर्कशे स्निग्धः' इति विश्वः । नरैर्मनुष्यैः नित्याभिषिक्तां मूर्तिं शरीरं बिभर्षि । पञ्चषचक्रतः पञ्चषचक्रैः प्राह्यः विक्रेतुं योग्यः । चक्रमिति द्रव्यपरिमाणविशेषे दाक्षिणात्यप्रयोगात् । बन्धो बन्धनं, मोक्षो बन्धनस्थानाद्द्रोष्ठाद्वाह्य-काद्वा मुक्तिः, तदुभयमपि कलयसि करोषि । महिषबन्धनमोक्षयोरन्यकर्तृकत्वेऽपि सौकर्यातिशय-विवक्षया स्थाली पचतीतिवत्प्रयोगो गौणः । सुक्षेत्रस्य उत्तमशालीक्षेत्रस्य श्रियं सस्यादिद्वारा शोभामादधासि करोषि । महता अज्ञानेन जाड्येन पूज्यः संरक्षणीयः; विवेकिनां कृष्यादौ प्रवृत्त्यदर्शनात् । तत् तस्मात्कारणात् सालग्राम इवावभासि । इत्येत्याश्चर्ये । सालग्रामपक्षे—पञ्चष-चक्रतो ग्राह्यः, चक्राधिक्ये भगवत्संनिधानाधिक्यात् । बन्धमोक्षौ संसारापवर्गौ; सुक्षेत्रेण समीची-नक्षेत्रेण द्वादशमूर्तिसमावेशरूपेण श्रियं सार्वभौमादिसंपत्तिम्; महता ज्ञानेन अत्युत्तमश्रद्धारूपेण ॥

गम्भीरस्तिमितो न कम्पमयसे गर्वोऽस्यपानेन च
प्रायः किं च सदाशनक्रमकरो नित्यं नदीनोऽसि च ।
संपूर्णः पृथुरोमभिश्च भजसे वृद्धिं क्षयं चाश्नुषे
तत्त्वं कासरमण्डलेश्वर जलप्रायः [1]समुद्रोऽसि नः ॥ ६३ ॥

गम्भीर इति । गम्भीरश्चित्तचापलरहितः, तिमितो निश्चलः कम्पं भयं नायसे न प्राप्नोषि । अपानेनापानवायुना गर्वो निन्द्यः । प्रायः प्रायेण सदाशनक्रमं भक्षणक्रमं करोतीति तादृशः । नित्यं सर्वदा नदीनः याच्ञादिदैन्यरहितः । पृथुभिर्महद्भिः रोमभिः संपूर्णो व्याप्तः । वृद्धिं भक्षणादिजनितशरीरवृद्धिं भजसे प्राप्नोषि । क्षयं गृहम्; 'निवेशः शरणं क्षयः' इत्यमरः । अश्नुषे गच्छसि । तत्तस्मात्कारणात् हे कासरमण्डलेश्वर महिषयूथाधिप जलप्रायो जडप्रायः, नोऽस्माकं समुद्रो मुद्रया चिह्नेन सहितः असि भवसि । समुद्रपक्षे— गम्भीरो निम्नरूपः; 'निम्नं गभीरं गम्भीरम्' इत्यमरः । तिमितो मत्स्यविशेषात् कम्पं चलनम्; अपानेन पानाभावेन; दाशाश्च जलसंचारिनराः, नक्राः ग्राहाश्च, मकराः मत्स्यविशेषाश्च तैः सहितः, नदीनां गङ्गाप्रभृतीनां इनः पतिः, पृथुरोमभिर्मत्स्यविशेषैः; 'पृथुरोमा झषो मत्स्यः' इत्यमरः । क्षयवृद्धी ह्रासाधिक्ये ॥ ६३ ॥

---

1. सरस्वानपि

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

अर्कं भक्षयितुं प्रधावसि नवं कृत्यं जनानन्दनो
निःशङ्कं कुरुषे समुद्रतरणं प्रत्यक्षमाधावसि ।
वीर्याधिक्यवशादुपर्युपरि चोत्साहं च कामं भज-
न्मन्ये श्रीमहिषाधिराज भुवनेष्वन्यो हनूमान्भवान् ॥ ६४ ॥

अर्कमिति । नवं नूतनम् , अर्कमर्कवृक्षं भक्षयितुं प्रधावसि प्रकर्षेण गच्छसि । जनानां लोकानामानन्दनः संतोषजनकः सन्, समुत् मुदा संतोषेण सहितं यथा भवति तथा रतं सुरत-रूपमेव रणं युद्धं कृत्यं कुरुषे । अक्षं शकटावयवदारुविशेषं प्रति क्रोधवशेन भङ्क्तुमाधावसि । वीर्यस्य बलस्य आधिक्यवशात् उपर्युपरि उत्तरोत्तरमुत्साहं कामं मन्मथविकारं च भजन् हे महिषाधिराज भुवनेषु लोकेषु अन्यः प्रसिद्धहनुमदपेक्षया इतरो हनूमानिति मन्ये । हनूमत्पक्षे— अर्कं रविम् ; कृती कुशलः, 'कृती कुशलः' इत्यमरः । अञ्जनाया नन्दनः पुत्रः ; निःशङ्कं यथा तथा, निर्भयं यथा तथा समुद्रतरणं शतयोजनविस्तीर्णसमुद्रोल्लङ्घनम् । अक्षमक्षाख्यं रावणसुतम् । वीर्याधिक्यवशात्पराक्रमातिरेकात् उपर्युपरि कामममितमुत्साहं रणोत्साहम् । अत्र नवोदितार्क-फलबुद्ध्या भक्षयितुं प्रवृत्ते हनुमति इन्द्रप्रयुक्तवज्रायुधात्कुण्ठीभूते देवताभ्यो वरं प्राप्य शतयो-जनविस्तीर्णसमुद्रं तीर्त्वा अक्षकुमारादिसर्वराक्षसान्हत्वा श्रीरामप्रसादं संपादयामास हनुमानिति श्रीमद्रामायणादिकथाऽनुसंधेया ॥ ६४ ॥

लोकख्यातसहस्रदोषमखिलद्वीपेषु संचारिणं
क्रीडन्तं किल नर्मदाम्बुनि मुदा कीर्त्या समालिङ्गितम् ।
सम्यग्भूषितमादरात्सदसि संमर्देष्वपास्तत्रसं
प्रायः सैरिभ मन्वते भुवि जनास्त्वां कार्तवीर्यार्जुनम् ॥ ६५ ॥

लोकेति । लोके भुवने ख्याताः प्रसिद्धाः सहस्रदोषाः अविवेकित्वादयो यस्य तादृशम्; अखिलेषु बहुषु द्वीपेषु जलमध्यस्थभूप्रदेशेषु संचारिणम्, नर्म सुखं ददातीति नर्मदं सुखप्रदं, अम्बु जलं तस्मिन्क्रीडन्तम्; मुदा संतोषेण कीर्त्या कर्दमेन 'कीर्तिर्यशसि कर्दमे' इत्यमरः । समालिङ्गितं समाश्लिष्टम्, सम्यगादरादिच्छया सदसि भूमौ वसितमुपविष्टम् । कर्षकैरुपवेशितमित्यर्थः । सदसि सभायां संमर्देषु संघर्षेषु च अपास्तः निरस्तः त्रसो भयं यस्य तादृशम्; 'त्रसी उद्वेगे' इत्यस्माद्धातोः घञर्थे कविधानमिति कप्रत्ययः । 'विश्वत्रसात्रसविलक्षणलक्षितायाः' इति प्राचीन-प्रयोगात्त्रसशब्दस्य भयपरत्वं बोध्यम् । अपास्तत्रपमिति पाठश्चिन्त्यः, महिषे लज्जाप्रसक्त्य-भावात् । प्रायो बहुशः हे सैरिभ कासर त्वां कार्तवीर्यार्जुनं कृतवीर्यात्मजं राजानं भुवि भूलोके

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जनाः मनुष्याः मन्यते जानते । कार्तवीर्यार्जुनपक्षे—लोकख्याताः सहस्रं दोषो बाहवो यस्य सः तादृशम्, अखिलद्वीपेषु संचारिणम्; अखिलद्वीपेषु यज्ञानुष्ठानार्थं संचारस्य पुराणप्रसिद्धत्वात् । नर्मदाया रेवाया अम्बुनि जले; तस्य रेवातीरवासित्वात् । कीर्त्या यशसा; भूषितं भूषणैः किरीटादिभिर्भूषितम् । आदरात्संतोषेण, सन्तः समीचीना ये असिसंमर्दाः खड्गयुद्धानि तेषु अपात्तत्रासो यस्य तादृशम् ॥ ६५ ॥

उल्लेखान्विविधान्करोषि च पदन्यासस्तवान्यादृशः
पद्यालोकनदत्तदृष्टिरसि च प्रायः प्रबन्धे स्थितः ।
कोशाधारतया स्थितश्चरसि कप्रायस्थले सादर-
स्तेन श्रीमहिषाधिराज सुकविं त्वामेव मन्यामहे ॥ ६६ ॥

उल्लेखानिति । उल्लेखान् कृषिविशेषान् विविधान् बहुविधकठिनमृदुपङ्कादिभेदेन बहुविधान् करोषि तनोषि । तव पदस्य चरणस्य न्यासः अन्यादृशः इतरविजातीयः । पद्याया मार्गस्य, 'सरणिः पद्धतिः पद्या' इत्यमरः । आलोकने दर्शने दत्तदृष्टिः प्रापितचक्षुष्कः, भक्षणार्थमिति भावः । प्रायः प्रबन्धे बन्धने एव स्थितः; गृहे वा केदारे वा सर्वदा बद्धत्वात् । कोशस्य धनधान्यादिसमुदायस्याधारतया मूलतया स्थितश्चरसि भक्षयसि; न तु त्वत्कृषणं व्यर्थमिति भावः । कप्राये जलप्राये, 'कं शिरोऽम्बुनोः' इत्यमरः । स्थले प्रदेशे सादरः । तेन कारणेन हे महिषाधिराज सुकविं त्वां मन्यामहे । कविपक्षे—उल्लेखान् विविधान् बहुविधानुल्लेखालंकारानित्यर्थः । पदन्यासो वैदर्भ्यादिरीतिविशेषः । पद्यस्य श्लोकस्यालोकने आलोचने दत्तदृष्टिः, प्रबन्धे ग्रन्थकरणे; कोश अमरादिराधारो मूलप्रमाणं यस्य सः, तस्य भावस्तत्ता, तया स्थितश्च । रसिकप्राये रसिकभूयिष्ठे स्थले प्रदेशे सादरः, अरसिकेषु कवेः प्रयोजनाभावात् ॥ ६६ ॥

वर्णैर्नैकविधैर्युतोऽसि च रसाधारोऽसि बन्धोज्ज्वलो
पुष्टात्मा ध्वनिगर्भितश्च बहुभिः पादैरुपेतोऽसि च ।
तत्सत्यं महिषेन्द्र सत्कविकृतश्लाघ्यप्रबन्धायसे
त्वामालोक्य पुनः पुनर्नवरसालंकारमीहामहे ॥ ६७ ॥

वर्णैरिति । नैकविधैरनेकप्रकारैर्वर्णैर्नीलादिभिर्युतोऽसि च । रसा भूमिराधारः स्थानं यस्य स तादृशः; बन्धैर्बन्धनैरुज्ज्वलः शोभमानः, बन्धनपरित्यागे स्वेच्छया कर्दमादिलुठनेन मलिनत्वादिति भावः । पुष्टः पुष्ट आत्मा देहो यस्य तादृशः, ध्वनिगर्भितः सर्वदा क्रन्दनस्वभावः; बहुभिश्चतुर्भिः पादैश्चरणैरुपेतोऽसि । तस्मात्कारणात् हे महिषेन्द्र सत्कविकृत-

कालिदासादिरचितः श्लाघयितुं योग्यो यः प्रबन्धो नाटकादिः स इवाचरसि, अत इति शेषः। अतः कारणात्त्वां पुनः पुनरालोक्य नवरसालंकारं नवश्चासौ रसाया भूमेरलंकारश्च तमीहामहे। इच्छामहे। प्रबन्धपक्षे— वर्णैः कादिभिरक्षरैः, रसानां शृङ्गारादीनामाधारोऽसि। बन्धेन खड्गपद्ममुरजादिबन्धेन उज्ज्वलः, वृत्तात्मा, स्रग्धरादिवृत्तात्मा ध्वनिना व्यङ्ग्यार्थेन गर्भितः; युक्त इत्यर्थः। अत्र श्लाघ्यप्रबन्धायस इत्यनेन महाकविप्रणीतोत्तमकाव्यसादृश्यं प्रतिपिपादयिषितम्। तच्च पूर्वोत्तरविशेषणसंदर्भैः स्पष्टम्। तथा हि— रसाधारोऽसीत्यनेन नवरससंपत्तिः प्रतीयते। तया निर्दोषत्वमपि ध्वन्यते, दोषसत्त्वे रसाप्रतीतेः, रसाभिव्यक्तिप्रतिबन्धकस्यैव दोषत्वात्। तदुक्तमालंकारिकैः—'रसास्वादविरोधित्वं दोषत्वं परिकीर्तितम्' इति। बन्धोज्ज्वल इत्यनेन शब्दालंकारसंपत्तिः। ध्वनिगर्भित इत्यनेन वाच्यातिशायिव्यङ्ग्यप्रतीतिः। तदुक्तं काव्यप्रकाशे— 'वाच्यातिशायि व्यङ्ग्यं यदुत्तमं तद्ध्वनिश्च सः' इति। न च पूर्वार्धेन प्रबन्धसादृश्यं हेतुत्वेन प्रतिपाद्यम्। त्वामालोक्येत्यादिना नवरसालंकारप्रतिपादनात्प्रबन्धेऽपि नव रसा वक्तव्याः। तथा च काव्यप्रकाशविरोधः। तत्र रसनिरूपणावसरे अष्टानां रसानां प्रतिपाद्यमानत्वादिति वाच्यम्। तस्य नाट्याभिनेयरसपरत्वात्। तदप्युक्तं तत्रैव—'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्सा-द्भुतसंज्ञौ चेत्यष्टौ नाट्यरसाः स्मृताः॥' इति। शान्तरसस्याभिनेयत्वाभावेन नाट्यरसत्वाभावात्। 'निर्वेदस्थायिकः काव्ये शान्तोऽपि नवमो रसः' इति तत्रैव नवरसस्य व्यक्तत्वान्नवरसालंकारत्वं प्रबन्धे युक्तमेवेत्यन्यत्र विस्तरः॥ ६७॥

प्रीतिं यासि मृदङ्गतः कलयसे तालप्रमाणं तनौ
चातुर्यं बहुलास्यकर्मसु नृणां संदर्शयन्व्यञ्जकम्।
कुर्वन्स्वीयपरिश्रमाद्बहुविधादर्थैः सभारं जनं
[1]सत्यं सैरिभमण्डलेन्द्र भरताचार्यत्वमालम्बसे॥ ६८॥

प्रीतिमिति। मृदा मृत्तिकया युक्तमङ्गं मृदङ्गम्; तस्मात्प्रीतिं संतोषं यासि प्राप्नोषि; कर्दमादिषु स्वाच्छन्द्येन प्रवृत्तिदर्शनादिति भावः। तनौ शरीरे तालप्रमाणं तालवृक्षसदृशौन्नत्यं कलयसे; तद्वदुन्नतो भवसीत्यर्थः। नृणां पुरुषाणां व्यञ्जकं स्वीयलिङ्गं संदर्शयन् बहुलमाधिक्यं यथास्यकर्म महिषीमनोजगृहाघ्राणमुखोन्नमनादिरूपम्; तत्र चातुर्यं कलयसे इति पूर्वेणान्वयः। बहुविधादनेकप्रकारात्कृष्यादिरूपात्स्वीयपरिश्रमात्स्वकीयखेदात्कारणीभूतात्संपादितैरर्थैर्धनधान्यादि-भिर्जनं लोकं सभारं भारयुक्तं कुर्वन् हे सैरिभमण्डलेन्द्र भरताचार्यत्वं भरतशास्त्रज्ञत्वम्; त्वमिति शेषः। आलम्बसे प्राप्नोषि। भरताचार्यपक्षे—मृदङ्गतो वाद्यविशेषाच्चर्मावनद्धमुखरूपात्। तदुक्तं

---

1. नूनं सैरिभसार्वभौम

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संगीतरत्नाकरे वाद्याध्याये —'चतुर्विधं भवेद्वाद्यं वृत्तं सुषिरमेव च। अवनद्धं घनं चेति ततं च त्रिविधं भवेत् ॥ वीणादि सुषिरं वंशकाहलादि प्रकीर्तितम्। चर्मावनद्धवदनं वाद्यते पटहादिकम् ॥ अवनद्धं च तत्प्रोक्तं कांस्यतालादिकं घनम् ॥' इति। ततो तालस्य तालाख्यस्य प्रमाणं शास्त्रोक्तं मानम्। तालस्वरूपमपि तत्रैवोक्तम्—'तालः काल इति प्रोक्तः सोऽवच्छिन्नो द्रुतादिभिः। गीतादिमानकर्ता स्यात्स द्वेधा कथ्यते बुधैः ॥' इति। लास्यकर्मसु नर्तनकर्मसु; 'लास्यं नृत्तं च नर्तनम्' इत्यमरः। बहु चातुर्यं चतुर्विधत्वम्। तत्स्वरूपमुक्तं संगीतसारोद्धारे—'निरूपिते गीतवाद्ये नर्तनं प्रोच्यतेऽधुना। नर्तनं गात्रविक्षेपविशेषः कथ्यते बुधैः ॥' इति। व्यञ्जकमभिनयं संदर्शयन्; 'व्यञ्जकाभिनयौ समौ' इत्यमरः। तत्स्वरूपमपि तत्रैव निरूपितम्—'प्रकटीकुरुते पात्रमाभिमुख्येन योऽर्थगः। पदार्थगोऽप्यभिनयश्चतुर्धा स निरूपितः ॥ आङ्गिको वाचिकस्तद्वदाहार्यः सात्त्विकोऽपरः। आङ्गिकोऽङ्गैर्विनिर्वृत्तो नाटकादिषु वाचिकः ॥ आहार्यो हारकेयूरकिरीटादिनिरूपणम्। सात्त्विकः सात्त्विकैर्भावैर्नर्तकेन विभावितः ॥' इति। एतेषां निरूपणं तु तत्रैव बोध्यम्। विस्तरभयान्न लिख्यते ॥ ६८ ॥

अथैकादशभिः भगवतः श्रीमहाविष्णोरवतारदशकं महिषेश्वरेऽपि निरूपयति—

त्वं श्रुत्युद्धरणं करोषि भृशमुन्मज्जन्निमज्जन्मुहुः
पारावारपयोऽन्तरालविहृतिप्राप्तप्रमोदोत्सवः।
संप्राप्नोषि ततो विधिं बहुमुखं प्रीत्यागमेष्वादरा-
त्तन्नूनं महिषक्षितीश्वर भवान्मत्स्यावतारो हरिः ॥ ६९ ॥

त्वमिति। त्वं मुहुर्मुहुरुन्मज्जन्निमज्जंश्च श्रुत्योः श्रोत्रयोरुद्धरणमूर्ध्वोन्नमनं करोषि। पारावारस्य समुद्रसदृशजलाशयस्य पयोऽन्तराले जलमध्ये विहृत्या विहारेण प्राप्तः प्रमोदः संतोष एवोत्सवो येन स तादृशः। ततो जलावगाहानन्तरं बहुमुखं बहुप्रकारं विधिं व्यापारं कृषिधान्यवहनादिकं प्रीत्यागमेष्वादरात्प्रीतिप्राप्तिष्वादरात् संप्राप्नोषि। तत्तस्मात्कारणात् हे महिषक्षितीश्वर भवान् मत्स्यावतारो हरिर्नूनम्। मत्स्यावतारपक्षे— पारावारस्य समुद्रस्य; 'पारावारः सरित्पतिः' इत्यमरः। श्रुत्युद्धरणं वेदोद्धरणम्। ततो वेदोद्धरणानन्तरम्, बहुमुखं चतुर्मुखम्, विधिं ब्रह्माणम्, वेदप्रतिपादनार्थं प्राप्त इति पुराणप्रसिद्धिः ॥ ६९ ॥

वज्रादप्यतिनिष्ठुरं तव पुनः पृष्ठं धराधिष्ठितं
निःश्वासास्तु पयोनिधेरपि पयःप्रक्षोभदक्षा इमे।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वीयत्वेन च कच्छपालिषु सदा प्रीतिं दधास्याशये
तेन त्वं महिषेन्द्र नूनमधुना कूर्मावतारो हरिः ॥ ७० ॥

वज्रादिति । वज्रादपि हीरकादपि अतिनिष्ठुरमतिकठिनं तव पृष्ठं धरायां भूम्यामधिष्ठितमुपविष्टम् । तव निःश्वासात्तु पयोनिधेरपि महाह्रदस्यापि, प्रक्षोभः कलुषीकरणम् ; तत्र दक्षाः समर्थाः । आशये जलाशये कच्छानामनूपानाम् ; 'आभिमुख्येऽथ कच्छः स्यादनूप...' इति विश्वः । पालिषु समूहेषु स्वीयत्वेन स्वकीयत्वेन प्रीतिं दधासि । तेन कारणेन हे महिषेन्द्र कूर्मावतारो हरिर्नूनम् । कूर्मपक्षे— धरायां भूम्यामधिष्ठितं पृष्ठं पृष्ठभागः । कच्छपानां कूर्माणामालिषु समूहेषु, आशये अन्तःकरणे ; अन्यत्सर्वं समानम् ॥ ७० ॥

उत्साहेन पुरा वराहवपुषा शृङ्गेण गामुद्धर-
स्युद्दामात्मगुणः सितस्ववदनं व्यावृत्य चालोकसे ।
सौकर्यं भुवनानि पातुमयसे वक्त्रे महाविस्तृते
तस्त्वां श्वेतवराहमूर्तिमधुना जाने महासैरिभ ॥ ७१ ॥

उत्साहेनेति । उत्साहेन संतोषेण पुरा प्रथमं वरः श्रेष्ठः आहवो युद्धं पुष्यातीति तादृशः ; तेन शृङ्गेण विषाणेन गां धेनुमुद्धरसि । गवा युद्धप्रसक्तौ गां शृङ्गाग्रेण क्षिपसीत्यर्थः । उद्दामः उत्सृष्टदामक आत्मगुणो यस्य स तादृशः । दामेति बहुपशुबन्धनयोग्यमहारज्जौ प्रसिद्धिः । तस्मादात्मबन्धनरज्जुं छित्वा धावसीत्यर्थः । सितं श्वेतं स्ववदनं स्वमुखं व्यावृत्य परावृत्य आलोकसे ईक्षसे । भुवनानि जलानि ; 'भुवनं विष्टपे लोके सलिलेऽपि वियत्यपि' इति विश्वः । पातुं सौकर्यं सुकरत्वं महाविस्तृते ; तटाकादाविति शेषः । अयसे प्राप्नोषि । तस्मात्त्वां श्वेतवराहमूर्तिमहं जाने । वराहपक्षे— वराहवपुषा सूकरदेहेन गां भूमिं ; महाविस्तृते वक्त्रे सौकर्यं सूकरभावम् ; कण्ठादधो मानुषाकारत्वादिति भावः । भुवनानि लोकानि पातुं रक्षितुम् ॥ ७१ ॥

क्षेत्रज्ञस्य हिरण्यवर्धनकृतः प्रह्लादमापुष्णतः
प्राप्तस्योपनिषद्वरं पृथुतरस्तम्भाद्बहिर्निर्यतः ।
लोकानां स्थितये वितस्य च निजां केदारलक्ष्मीं परां
को भेदस्तव कासरेश्वर विभो श्रीमन्नृसिंहस्य च ॥ ७२ ॥

क्षेत्रज्ञस्येति । क्षेत्रं स्वकृष्टशाल्यादिक्षेत्रं जानातीति क्षेत्रज्ञः । गृहान्मुक्तः परिचयवशात्स्वीयकेदारमेव गच्छतीति भावः । हिरण्यस्य सुवर्णस्य वर्धनं वृद्धिं करोतीति तादृशस्य

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रकर्षेण ह्वादं संतोषं आसमन्तात् पुष्णातीति ताहशस्य, उपनिषद्वरं निषद्वरस्य पङ्कस्य समीपम्; 'निषद्वरस्तु जम्बालः' इत्यमरः। प्राप्तस्य, पृथुतरस्तम्भात् दृढस्थूलतरस्तम्भात् बहिर्निर्यतः गच्छतः। स्तम्भस्याल्पपरिमाणत्वे तदुत्पाट्य पलायनसंभवादिति भावः। लोकानां जनानां स्थितये वृत्त्यर्थं निजां स्वाभाविकीं केदारलक्ष्मीं केदारजनितश्रियं धनधान्यादिरूपां श्रितस्य प्राप्तस्य हे कासारेश्वर विभो तव श्रीमन्नृसिंहस्य च को भेदः? कोऽपि भेदकधर्मो नास्तीत्यर्थः। नृसिंहपक्षे—क्षेत्रज्ञस्य सर्वप्राणिनामन्तर्यामितया आत्मरूपस्य; 'क्षेत्रज्ञ आत्मा पुरुषः' इत्यमरः। हिरण्यस्य हिरण्यासुरस्य वर्धनं छेदनं करोतीति ताहशस्य। प्रह्लादं तत्पुत्रं निजभक्तमापुष्णतो रक्षतः। उपनिषद्वरं नृसिंहतापिनीप्रभृतिम्; पृथुतरस्तम्भान्निर्यतः, स्तम्भादेव नृसिंहाविर्भावादिति भावः। लोकानां भूरादीनां स्थितये अवस्थानार्थं निजाङ्के स्वीयोत्सङ्गप्रदेशे दारात्मिका कलत्रात्मिका या लक्ष्मीस्तां श्रितस्य प्राप्तस्य; हिरण्याक्षं हत्वा तदीयरक्तं पीतवतो भगवतः क्रोधाविर्भावस्या-त्सर्वजगत्संहारे कृतोद्योगस्य लक्ष्मीसंनिधानात्क्रोधशान्तिरिति पौराणिककथाऽनुसंधेया ॥ ७२ ॥

कौपीनाङ्कतया स्थितोऽसि चरसि त्वं दण्डहस्तान्वितः

सोत्साहं बलिना समं कलयसि स्पर्धां प्रतिस्पर्धिना।

पादं न्यस्य रसातले स्ववपुषा त्वं पुष्करं गाहसे

तेन त्वां महिष त्रिविक्रमकृतं नारायणं मन्महे ॥ ७३ ॥

काविति। कौ भूमौ; 'गोत्रा कुः पृथिवी' इत्यमरः। पीनाङ्कतया पुष्टाङ्कतया स्थितोऽसि। दण्डः हस्ते यस्य स ताहशेनान्वितश्चरसि। सोत्साहं यथा तथा बलिना बलवता प्रतिस्पर्धिना प्रतिद्वंद्विना स्पर्धां कलहं कलयसि। रसातले भूतले पादं न्यस्य स्ववपुषा त्वं पुष्करं जलं गाहसे प्रविशसि। तेन कारणेन त्रिविक्रमकृतं त्रिविक्रमावतारकृतं नारायणं महाविष्णुं मन्महे जानीमः। त्रिविक्रमपक्षे—कौपीनाङ्कतया कौपीनाच्छादनवत्तया, वामनावतारस्य ब्रह्मचारिवेषत्वात्। दण्डयुक्तो हस्तः दण्डहस्तः तेनान्वितः। बलिना वैरोचनिना। रसातले पाताले एकं पादं निक्षिप्य पुष्करं गगनम्; 'व्योम पुष्करमम्बरम्' इत्यमरः। त्रिविक्रमकृतं पदत्रयविक्षेपकृतम् ॥

निर्धूतोऽपि लसत्कलुं गुरुहृदे स्वीयां महारेणुकां

रूढं रूढमशेषमर्जुनकुलं चामूलमुन्मूलयन्।

कीलालैर्भरितेषु विस्तृतसरःस्वामज्ज्य संतुष्टधी-

र्धत्से भार्गवरामसाम्यमधुना श्रीमन्महालेरिभ ॥ ७४ ॥



P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

निर्धूनोषीति। गुरुमुदे महासंतोषाय, महान्तो रेणवो यस्याः सा, तां महारेणुकां स्वीयां लसन्ती शोभमाना या तनुः, तां निर्धूनोषि कम्पयसे। रूढं रूढमुत्पद्योत्पद्य स्थितमिति शेषः। अशेषं यथा तथा अर्जुनकुलं तृणवर्गम्; 'यवसं तृणमर्जुनम्' इत्यमरः। आमूलं मूलमारभ्य उन्मूलयन्नुत्पाटयन्, कीलालैर्जलैः; 'पयः कीलालममृतम्' इत्यमरः। भरितेषु पूरितेषु विस्तृतसरःसु महाजलाशयेषु आमज्य संतुष्टधीः प्रसन्नबुद्धिः, हे महासैरिभ त्वं भार्गवरामसाम्यं परशुरामसाम्यम्, अधुना इदानीं धत्से। परशुरामपक्षे—लसत्तनुं शोभितदेहां गुरोः भृगोर्महर्षेः मुदे स्वीयां स्वकीयमातरं महारेणुकां रेणुकादेवीम्। अर्जुनकुलं कार्तवीर्यार्जुनकुलम्; कीलालैः रक्तैः, 'शोणितेऽम्भसि कीलालम्' इत्यमरः। क्षत्रकुलं हत्वा रक्तसरसि पितृतर्पणं कुर्यामिति तत्पतिज्ञानादिति भावः॥

मञ्जूषाञ्चितरौद्रधन्वसुदृढज्याकर्षणे ख्यातिमा-
न्त्सीतायां प्रणयं करोषि न जनस्थाने च धत्से भयम्।
वाहिन्यां कुरुषे तथा शरशिरश्छेदं यथेष्टं चर-
न्रामस्त्वं निजलक्ष्मणान्विततया श्रीमल्लुलायप्रभो॥ ७५॥

मञ्जूषेति। मञ्जुः मनोज्ञा उषा लवणाकरभूमिः; 'उषः स्याल्लवणाकरः' इत्यमरः। तया अञ्चितो युक्तः रौद्रः भयंकरः धन्वा मरुभूमिः, 'समानौ मरुधन्वानौ' इत्यमरः। सुदृढज्या कठिनभूमिः तयोराकर्षणे ख्यातिमान् प्रसिद्धिमान्। सर्वोऽपि भूमिर्महिषेण कृष्टुं योग्येति भावः। सीतायां लाङ्गलपद्धतौ; 'सीता लाङ्गलपद्धतिः' इत्यमरः। प्रणयं स्नेहं करोषि। जनस्थाने जनावासे भयं न धत्से। वाहिन्यां नद्यां शराणां दर्भाणां शिरश्छेदमग्रखण्डनं कुरुषे यथेष्टं यथाभिलषितं चरन् भक्षयन्। निजलक्ष्मणा निजचिह्नान्विततया श्रीमल्लुलायप्रभो त्वं रामः दाशरथिः। रामपक्षे—मञ्जूषायां पेटिकायामञ्चितं रौद्रं रुद्रसंबन्धि यद्धनुस्तस्य सुदृढा अतिकठिना ज्या मौर्वी; 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः। सीतायां जनकात्मजायाम्; जनस्थाने खरदूषणादिराक्षसावासे; रामः स्वयमेकोऽपि चतुर्दशसहस्रराक्षसमध्ये न बिभेतीति भावः। वाहिन्यां सेनायाम्, आशराणां राक्षसानां शिरश्छेदं, चरन् संचरन्निति॥ ७५॥

कृष्णस्ते सहजो हलं वहसि च स्कन्धे प्रलम्बाकृतिं
त्वं धूनोषि हलाञ्चलेन धरणीमुन्मूलयस्याग्रहात्।
श्रीमत्कासर सादरोऽसि मदिरां पातुं च संकर्षणः
साक्षात्त्वं बलराम एव हि वहन्नीलांशुकं स्वं वपुः॥ ७६॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कृष्ण इति । ते कृष्णः नीलवर्णः सहजः सहोत्थः । स्कन्धे अंसे प्रलम्बाकृतिं लम्बमानं हलं लाङ्गलं वहसि । त्वं धूनोषि कम्पयसे ; हलमित्यनुषज्यते । हलाञ्चलेन लाङ्गलाग्रेण धरणीं भूमिं आग्रहात्कोपादुन्मूलयसि विदारयसि । मदिरां मत्संबन्धिनीं, इरां लक्ष्मीं धनधान्यादिरूपां पातुं रक्षितुं सादरोऽसि आदरयुक्तोऽसि । संकर्षणः सम्यक्कृषिकर्ता, नीला अंशवः कान्तयो यस्य तन्नीलांशुकं स्वं स्वकीयं वपुः शरीरं वहन् हे श्रीमत्कासर त्वं बलराम एव । बलरामपक्षे—कृष्णः श्रीवासुदेवः, हलं हलायुधं, प्रलम्बाकृतिं प्रलम्बासुरं, हलाञ्चलेन सीराग्रेण धरणीं हस्तिनापुरीं, मदिरां मद्यम्; 'मदिरा कश्यमद्ये च' इत्यमरः । संकर्षणः संकर्षणसंज्ञकः, नीलमंशुकं वस्त्रं यस्य तन्नीलांशुकम् ॥ ७६ ॥

> संप्राप्तः सहजं बलं भुवि महाञ्जातोऽसि कृष्णात्मना
> कं सानन्दमहो मुखेन सरसो गृह्णासि गोपान्वितः ।
> नैकाभिर्महिषीभिरन्वहमपि क्रीडां विधत्से मुदा
> त्वं साक्षाद्यदुनाथ एव महिषाधीशाद्य संलक्ष्यसे ॥ ७७ ॥

समिति । सहजं स्वाभाविकं बलं पराक्रमं संप्राप्तः कृष्णात्मना नीलवर्णशरीरेण महान् महच्छरीरकः जातोऽसि उत्पन्नोऽसि । मुखेन वक्त्रेण सरसः कासारात् कं जलं सानन्दं यथा तथा गृह्णासि । अहो आश्चर्यम् । गोपान्वितः गोपालेनान्वितः, नैकाभिर्बह्वीभिः महिषीभिः अन्वहमपि प्रत्यहमपि मुदा क्रीडां रतिं विधत्से करोषि । साक्षाच्छ्रीयदुनाथ एव श्रीकृष्ण एव हे महिषाधिराज त्वं संलक्ष्यसे समालोक्यसे । श्रीकृष्णपक्षे—सहजमग्रजं बलं बलभद्रं, महान् सर्वपूज्यः कृष्णात्मना कृष्णरूपेण कंसस्यासुरविशेषस्य आनन्दं संतोषम् । अहोमुखेन अरुणोदयकालेन; 'अहरादीनां पत्यादिषु वा रेफः' इति रेफस्य वैकल्पिकत्वात् । महिषीभिर्नैकाभिः षट्छताधिकषोडशसहस्रस्त्रीभिः ॥ ७७ ॥

> निर्धूय श्रुतिमप्रमाणमिदमित्यन्तर्जलानां भव-
> च्छिष्टं कर्म विनिन्दितं विरचयन्कुर्वन्महासंकरम् ।
> सन्मार्गप्रतिदूषको भुवि यथाजातात्मना वर्तसे
> तेन त्वां गणयामि कासरपते बौद्धावतारं हरेः ॥ ७८ ॥

निर्धूयेति । श्रुतिं श्रवणं निर्धूय व्याधूय अगां प्रमाणमिदमिति अज्ञानामन्तः मध्यप्रदेशे भवन् । जलमध्यगतं महिषं दृष्ट्वा जना एतावज्जलं जानुदघ्नमूरुद्वयसमिति जानत इत्यर्थः । निन्दितं कर्म उच्छिष्टादिभक्षणमिदं विरचयन् कुर्वन्, महासंकरमभिक्रमवकरम्; 'संकरोऽवकरः'

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

इत्यमरः । कुर्वन्, शुद्धप्रदेशेऽपि तृणकीलादिकरणेनावकराधिक्यं करोषीत्यर्थः । सन्मार्गस्य समीचीनमार्गस्य प्रतिदूषको मूत्रविसर्गादिभिर्मलिनीकरणहेतुः । भुवि यथाजातात्मना नग्नत्वादिना वर्तसे तिष्ठसि । येन कारणेन हे कासरपते त्वां बौद्धावतारं हरिं गणयामि । बौद्धपक्षे—श्रुतिं वेदप्रमाणमिति न प्रमाणमिति निर्धूय जडानामन्तः अन्तःकरणे भवन्; मूढानां वेदा अप्रमाणमिति ज्ञापयन्नित्यर्थः । इष्टं यागादिकं कर्म निन्दितं विरचयन् हिंसात्वेन प्रतारयन्, महासंकरं वर्णाश्रमधर्मसंकरम् । सतां महर्षीणां मार्गस्य आचारस्य प्रतिदूषकः । यथाजातात्मना, बौद्धावतारस्य नग्नत्वेन तथैवसमवस्थितत्वादिति भावः ॥ ७८ ॥

सुक्षेमंकरवालहस्तमभितस्ताम्रायमाणे रजो-
भूम्ना इव युगान्त एव हि वृषक्लेशं विलोक्य स्वयम् ।
आधातुं सफलां महीं कृतयुगारम्भे स्थितं भूतले
मन्ये त्वां महिषाधिराज नियतं कल्कयात्मकं श्रीपतिम् ॥ ७९ ॥

सुक्षेमंकरेति । सुक्षेमंकरं समीचीनशुभकरं हस्त इवोपकारकं वालं यस्य तथाभूतम्; अभितः सर्वतः रजसां रेणूनां भूम्ना बाहुल्येन, युगस्य कण्ठोर्ध्वभागबद्धदारुविशेषस्य अन्तेऽग्रभागे, ताम्रायमाणे सति, बहुतरकर्षणेन पृष्ठभागोद्गतरक्तादिनाऽरुणीभूते सति वृषस्य वृषभस्य क्लेशं दुःखं विलोक्य दृष्ट्वा सफलां सस्यशालिनीं महीमाधातुं कर्तुं कृतः रचितः यः युगारम्भः, कृष्यारम्भः युगशब्देन तत्साधनकर्षणविवक्ष्यते । तत्र स्थितं वर्तमानम्; लाङ्गलबद्धं वृषभं श्रान्तं दृष्ट्वा महिषं बध्नन्तीत्यर्थः । इवेत्याश्चर्ये । येन कारणेन हे कासरपते त्वां कल्कयात्मकं हरिं गणयामि । कल्किपक्षे—करवालः खड्गः हस्ते यस्य स तादृशः; अभितस्ताम्रायमाणे यवनाक्रान्ते रजोभूम्ना रजोगुणप्राबल्येन युगान्ते कलियुगान्ते वृषक्लेशं धर्मग्लानिम्, महीं भूमिम्, सफलां सत्कर्मानुष्ठानजन्यवृष्ट्यादिफलयुक्ताम्, कृतयुगस्य धर्मप्रधानस्यारम्भे स्थितं विद्यमानम् ॥ ७९ ॥

कंदर्पं न भजस्यतीन्द्रियतनुः किं चासि पञ्चाननो-
ऽप्याकण्ठं च विषं पिबन्नतितरां धत्से सदामंगलम् ।
प्रीत्या सानुचरोऽचलोपरि मुदं धत्सेऽभिषेकोत्सवे-
ष्वग्रत्वादपि कासरेश्वर विरूपाक्षस्त्वमेवासि नः ॥ ८० ॥

कंदर्पमिति । कं दर्पं न भजसि ? सर्वमपि दर्पं भजसीत्यर्थः । कृष्यां वा भारवहनादौ वा सर्वत्र तव गर्वोऽस्तीत्यर्थः । अति अत्यन्तमिन्द्रियं वीर्याधिक्यं यस्याः सा तादृशी तनुर्यस्य सः, अतीन्द्रियतनुः । किं च, पञ्चाननोऽप्यसि विस्तृताननोऽप्यसि, आकण्ठं कण्ठपर्यन्तं विषं जलं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पिबन्, अतितरां सर्वदा सदामं दाम्ना रज्ज्वादिना सहितं गलं धत्से प्राप्नोषि । प्रीत्या विश्वासेन सानुचरः अनुचरेण महिषेण वृषभेण वा सहितः, अचलोपरि पर्वतोपरि मुदं संतोषं धत्से । स्वच्छन्दसंचारात् अभिषेकोत्सवैः जलावगाहनैः मुदं धत्स इति पूर्वेणान्वयः । उग्रत्वात् क्रूरत्वादपि हे कासरेश्वर त्वमेव नोऽस्माकं विरूपे विकृते अक्षिणी यस्य सः विरूपाक्षः, असि भवसि । ईश्वरपक्षे—कंदर्पं मन्मथं न भजसि, मन्मथविकाररहित इत्यर्थः । अतीन्द्रिया इन्द्रियागोचरा तनुः स्वरूपं यस्य तादृशः ; अवाङ्मनसगोचर इत्यर्थः । 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' इति श्रुतेः । किं चासि पञ्चाननः, परमशिवस्य तत्पुरुषादिपञ्चवक्त्रशोभितत्वात् । विषं कालकूटाख्यम् , आकण्ठं कण्ठपर्यन्तम् , सदा मङ्गलं चन्द्रकलागङ्गादिकम्, अचलोपरि श्री-कैलासोपरि, सानुषु प्रस्थेषु चरति संचरतीति तादृशः, अभिषेकोत्सवै रुद्राभिषेकादिभिः, मुदं संतोषं धत्से, उग्रत्वादपि उग्रपदवाच्यत्वादपि ॥ ८० ॥

प्रस्थप्रस्रवणान्वितोऽसि विपुलैः पादैरुपेतोऽसि च
प्रोत्तुङ्गं च बिभर्षि शृङ्गमधिकं गण्डोपलेनान्वितः ।
दुष्प्रापो बहुधावनैरसि महासत्त्वप्रकर्षोद्धतै-
र्नूनं कश्चन कासरेन्द्र चरसि त्वं सर्वतः पर्वतः ॥ ८१ ॥

प्रस्थेति । प्रस्थेन परिमाणविशेषेण युक्तं यत्प्रस्रवणं मूत्रं तेनान्वितो युक्तः ; विपुलैः महद्भिः पादैः चरणैः उपेतोऽसि युक्तोऽसि । प्रोत्तुङ्गमत्युन्नतम् , अधिकं शरीरप्रमाणाधिकं शृङ्गं विषाणं बिभर्षि । उपलसदृशेन गण्डेन कपोलेनान्वितो युक्तः । महासत्त्वस्याधिकबलस्य प्रकर्षेणो-त्कर्षेण उद्धतैः क्रूरैः बहुधावनैः बहुपलायनैः दुष्प्रापः दुःखेनापि गृहीतुमशक्योऽसि । हे कासरेन्द्र त्वं सर्वतोऽभितः कश्चन पर्वतः पर्वतस्वरूपी चरसि । नूनम् । पर्वतपक्षे—प्रस्थैः शिलाविशेषैः प्रस्रवणेन प्रवाहेन चान्वितः, पादैः पर्यन्तपर्वतैः ; 'पादाः पर्यन्तपर्वताः' इत्यमरः । शृङ्गं शिखरम् ; 'शृङ्गं प्रभुत्वे शिखरे' इति विश्वः । गण्डोपलेन पाषाणविशेषेण, बहुधा अनेकप्रकारैः महासत्त्वप्रकर्षेण व्याघ्रादिबहुमृगोत्कर्षेण उद्धतैर्भयंकरैः वनैररण्यैः ॥ ८१ ॥

भीष्मस्त्वं हि दशाननोऽसि च नृगस्त्वं हस्वरोमाऽप्यसि
भ्रातस्त्वं भरतः पृथुश्च तरसा नूनं मरुत्तोऽधिकः ।
इत्थं पुण्यपुराणभूपतिमये त्वय्यद्भुते जाग्रति
श्रीमन्सैरिभराज राजहतकान्नालोकयामः खलान् ॥ ८२ ॥

P. P. Ac. Gunratnasuri M.S.                                    Jin Gun Aaradhak Trust

भीष्म इति । त्वं भीष्मः भयंकरः, दृशा चक्षुषा अनलोऽसि अग्निवर्णोऽसि । त्वं नृगः नृगा गच्छतीति नृगः, कर्षकानुसारेण गच्छसीत्यर्थः । ह्रस्वानि रोमाणि यस्य स वाहसः । भातः त्वं भरतः आरात् पृथुर्महान् । तरसा वेगेन मरुत्तः वायोः अधिकः; नूनम् । इत्थं एवं-प्रकारेण पुण्याः धर्मात्मानः ये पुराणप्रसिद्धाः भूपतयो राजानः तन्मये तत्स्वरूपे त्वयि जाग्रति जागरूके सति हे सैरिभराज राजहतकान् राजाधमान् खलान् दुष्टान् नालोकयामः न पश्यामः । अत्र भीष्मादिपदैरवयवशक्त्या माहिषप्रतिपादनेऽपि भीष्मपदवाच्यत्वेन भीष्मादेरवर्ण्यस्य वर्ण्य-महिषभेदप्रतीतेर्न श्लेषोत्थापितरूपकालंकारविशेषः। न चात्र ध्वनिरिति भ्रमितव्यम्, अभिधायाः प्रकृतैकविषयत्वाभावादिति दिक् ॥ ८२ ॥

कर्णं निर्णुदसि त्रिगर्तपतितो धूनोषि तज्जीवनं
द्रोणं संततमुत्सरस्यपि गृहे नित्यं सुभद्रान्वितः ।
हन्तुं सैन्धवमीश्वरेण विहितं सामर्थ्यमासेदिवा-
न्धीर श्रीमहिषाधिराज भुवने मन्ये त्वमेवार्जुनः ॥ ८३ ॥

कर्णमिति । कर्णं श्रोत्रं निर्णुदसि, तद्गतमशकादिकं क्षिपसीत्यर्थः । त्रिगर्तपतितः अनेक-गर्तपतितः तज्जीवनं कर्णप्रविष्टजलं धूनोषि अधः पातयसि । द्रोणं द्रोणप्रमाणं संततमविच्छिन्नं यथा तथा उत्सरसि मूत्रयसि । अपि च, गृहे नित्यं सुभद्रेण वृषभश्रेष्ठेन अन्वितो युक्तः; 'उक्षा भद्रो बलीवर्दः' इत्यमरः। सैन्धवमश्वं हन्तुं मारयितुम्, ईश्वरेण प्रपञ्चस्रष्ट्रा विहितं रचितं सामर्थ्यं शक्तिमत्त्वं आसेदिवान् प्राप्तवान् । धीर भयहीन श्रीमहिषाधिराज भुवने त्वमेव अर्जुन इति मन्ये। अर्जुनपक्षे—कर्णं प्रसिद्धं सूर्यात्मजम्, त्रिगर्ते त्रिगर्तदेशे पतितो वर्तमानः, तज्जीवनं कर्णप्राणान्, द्रोणं द्रोणाचार्यं संततं सर्वदा उत्सरसि । द्रोणाचार्येण साकं योद्धव्यमिति प्रतिज्ञानात इत्यर्थः। गृहे सुभद्रया निजकलत्रेण, सैन्धवं जयद्रथं हन्तुम्, ईश्वरेण श्रीसाम्बसदाशिवेन विहितं सामर्थ्यं-मस्त्रशस्त्रादिकम् ॥ ८३ ॥

वेगादर्जुनमेव धावसि दृढं त्वं कालपृष्ठं वह-
न्भीमं मुञ्चसि किं च भूरि निनदं भत्सेऽकुलक्ष्मीं स्थिराम् ।
वाहिन्यां प्रसभं प्रविश्य कुरुषे क्षोभं प्रतापान्वित-
स्तस्मात्कर्ण इवाङ्ग सैरिभपते कामानवस्यार्थिनाम् ॥ ८४ ॥

वेगादिति । वेगादर्जुनमेव धावसि ; '‘यवसं तृणमर्जुनम्' इत्यमरः । दृढं कालयुक्तं धर्मराजयुक्तम्, पृष्ठं पृष्ठभागं वहन्, त्वं भीमं भयंकरम्, भूरि अधिकं निनदं शब्दं

मुञ्चसि करोषि । स्थिरां दृढाम्, अङ्गलक्ष्मीमवयवशोभां धत्से । वाहिन्यां नद्यां प्रसभं बलात्कारेण प्रविश्य प्रकृष्टतापेन सूर्यकिरणदाहेनान्वितः संक्षोभं कालुष्यं कुरुषे । तस्मात्कारणात् हे अङ्ग सैरिभपते अर्थिनामर्थवतां कर्षकाणां कामान् अवसि रक्षसि । कर्णपक्षे—अर्जुनमेव पार्थमेव, दृढं कालपृष्ठं तत्संज्ञकं शरासनम्; 'कालपृष्ठं शरासनम्' इत्यमरः । किं च, भूरिनिनदं बहुघोषयन्तं भीमं भीमसेनं मुञ्चसि । तमनादृत्यार्जुननिकटमेव यासीत्यर्थः । अङ्गलक्ष्मीमङ्गदेशाधिपत्यम्, वाहिन्यां सेनायाम्, प्रतापेन तेजोविशेषेणान्वितः ॥ ८४ ॥

लोके त्वं हि सधर्मराडसि महान्भीमोऽस्यपार्थोऽसि न
द्रोणीभूतमुखोऽसि कासरपते किं चासि नासत्यभूः ।
उद्घोषेण च कर्णशल्यमयसे भूरिश्रवोभीष्मतां
त्वत्संदर्शनतोऽद्य भारतकथा प्रत्यक्षमालोक्यते ॥ ८५ ॥

लोक इति । लोके त्वं सधर्मराट् धर्मराजेन यमेन सहितोऽसि । महान्भीमोऽसि भीषणोऽसि । अपगतोऽर्थो धनधान्यादिर्यस्मात्सोऽपार्थः तादृशो न; किं त्वर्थसहित इत्यर्थः । द्रोणीभूतमुखः द्रोणमिति धनधान्यमानपात्रविशेषः, तत्सदृशमुख इत्यर्थः । किं च, हे कासरपते असत्यस्य अनृतस्य भूः भूमिः स्थानं नासि । उद्घोषेण शब्दाधिक्येन कर्णशल्यं श्रोत्रपीडामयसे प्राप्नोषि; करोषीत्यर्थः । भूरिश्रवसां बहुश्रुतानां महतां निवृत्तानामिति यावत् । भीष्मतां भयंकरताम्; अयस इति शेषः । तस्मादिति शेषः । तस्मात्कारणात् त्वत्संदर्शनतः भारतकथा प्रत्यक्षमालोक्यते दृश्यते । भारतकथापक्षे—सधर्मराट् युधिष्ठिरसहितः, भीमो भीमसेनः, अस्यां कथायां वर्तेत इति शेषः । न विद्यते पार्थो यस्यां सा अपार्था तादृशी न; किं तु पार्थसहितैवेत्यर्थः । द्रोणीभूतं द्रोणात्मकं मुखं सेनामुखं यस्याः सा तादृशी, द्रोणस्य सेनापतित्वात् । नासत्याभ्यामश्विभ्यां भवतीति तादृशः नकुलः सहदेवश्च; अस्यां कथायां वर्तेत इति शेषः । कर्णशल्यं कर्णसहितं शल्यम् । भूरिश्रवाः प्रसिद्धः; भीष्मो गाङ्गेयः । भूरिश्रवोभीष्मशब्दाद्द्वन्द्वजन्तात् 'तस्य भावः' इत्यर्थे तल्प्रत्ययः । भूरिश्रवोभीष्मयुक्ततामयत इति फलितार्थः ॥

ज्यामाकर्षसि संगतार्तिं महतीं मध्ये शराणां चर-
न्धन्वाकर्षणविश्रुतः प्रकटयन्दोषं स्वकैः कर्मभिः ।
आलोक्यापि न भीतिमश्नासि परान्प्राप्तोच्छ्रयो विग्रहे
वीराग्रेसर कासरेश्वर ननु द्रोणस्त्वमेवासि नः ॥ ८६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ज्यामिति । संगता प्राप्ता आर्तिः पीडा यस्मिन् कर्मणि तद्यथा भवति तथा । 'आर्तिः पीडाधनुष्कोट्योः' इत्युभयत्राप्यमरः । महतीं विस्तृतां ज्यां भूमिम्, आसमन्तात्कर्षसि । शराणां जलानां मध्ये चरन् भक्षयन्; 'शरं नीरम्' इति विश्वः । धन्वाया मरुभूमेः कर्षणे कृषिकर्मणि विश्रुतः प्रसिद्धः, स्वकैः स्वीयैः कर्मभिः अकल्याणभक्षणादिभिः दोषं जाड्यादिरूपं प्रकटयन् विशदयन्, विग्रहे देहे प्राप्त उच्छ्रूयो वृद्धिर्यस्य तादृशः, त्वं परानुत्तमान् गजादीनाऽलोक्यापि दृष्ट्वाऽपि भीतिं भयं नाश्नसि न प्राप्नोषि । वीराणां शूराणामग्रेसर हे कासरेश्वर, नोऽस्माकं द्रोणाचार्यस्त्वमेवासि । ननित्यत्याश्चर्ये । द्रोणाचार्यपक्षे— संगतार्तिं मिलितधनुष्कोटि यथा तथा ज्यां मौर्वीम्; 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । आकर्षति नमयसि । शराणां बाणानां मध्ये चरन् संचरन् धन्वाकर्षणे धनुराकर्षणे विश्रुतः, स्वकैः कर्मभिः दोषं शत्रुहननादिरूपम् । परान् शत्रून् विग्रहे युद्धे प्राप्तोच्छ्रयः प्राप्तोत्कर्षः ॥ ८६ ॥

उच्चैरावणसोदरोऽसि च महापार्श्वोऽतिकायोऽप्यसि
स्थूलाकारमहोदरोऽसि नितरां त्वं मेघनादोऽप्यसि ।
धूम्राक्षोऽसि च दूषणोऽसि चरितैस्त्वं कुम्भकर्णोऽस्यतो
मद्ग्रामस्त्वदुपाश्रयेण भजते लंकारमाधारताम् ॥ ८७ ॥

उच्चैरावणेति । उच्च उन्नतो य एरावणो गजविशेषस्तस्य सोदरः, औन्नत्यादिति भावः । अन्यत्र, उच्चैरुन्नतो यो रावणो दशग्रीवस्तस्य सोदरो भ्राता विभीषणः । महान् स्थूलः पार्श्वः पार्श्वभागो यस्य स तथोक्तः । अन्यत्र, महापार्श्व इति राक्षसनाम । अतिकायोऽतिस्थूलदेहः । अन्यत्रातिकायो रावणात्मजः । स्थूलो महानाकारः आकृतिर्यस्य तादृशश्चासौ महत् बृहदुदरं यस्य स तथोक्तः । अन्यत्र महोदरो नाम राक्षसः । नितरां सुतरां त्वं मेघस्य नाद इव नादः शब्दो यस्य स मेघनादः । मेघ इवोच्चैः शब्दं करोषीत्यर्थः । धूम्रे धूम्रवर्णे अक्षिणी यस्य स तथोक्तः । चरितैश्चरित्रैरभक्ष्यभक्षणकर्दमलेपादिभिः दूषणोऽसि दूष्योऽसि । त्वं कुम्भकर्णः कुम्भौ कलशाविव कर्णौ यस्य स तथोक्तः । अन्यत्र, मेघनाद इन्द्रजित्, धूम्राक्षः प्रसिद्धः । एवं दूषणकुम्भकर्णावपि बोध्यौ । अतो हेतोः मद्ग्रामो मदावासग्रामस्त्वदुपाश्रयेण त्वत्सहायेन लङ्कायां या रमा लक्ष्मीः तदाधारतां तदाश्रयतां भजते प्राप्नोति ॥ ८७ ॥

सीतायां प्रसितो दृढं कृतयुगव्यापारघोरक्रमो
दर्पोज्जृम्भित हे हयाधिपहतिश्रान्तिं वहस्याहवे ।
प्रख्यातोऽस्यनरण्य एव विषयेऽप्युत्कृष्टधन्वा जवा-
न्मायावी स हि रावणः पुनरिह प्राप्तोऽसि किं मद्गृहे ॥ ८८ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सीतायामिति । सीतायां लाङ्गलपद्धतौ दृढं प्रसितः दृढं बद्धः, कृतः रचितः यः युगस्य गलबद्धदारुविशेषस्य व्यापारः कृष्यादिरूपः तस्मिन् घोरः क्रूरः क्रमः शक्तिर्यस्य स तादृशः ; 'रथसीराङ्गयोर्युगः' इति 'क्रमः शक्तौ परिपाट्याम्' इति च विश्वः । हे दर्पोज्जृम्भित दर्पेण बलेनोज्जृम्भित गर्विष्ठ आहवे युद्धे हयाधिपस्याश्वश्रेष्ठस्य हत्या हननेन या श्रान्तिः श्रमस्तां वहसि बिभर्षि । अनरण्ये अरण्यरहिते विषये देशे 'विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च' इति विश्वः । प्रख्यातः प्रसिद्धः ; आरण्यकमहिषाणां कृष्याद्युपयोगाभावेन न प्रसिद्धिरस्तीति भावः । जवाद्वेगात उत्कृष्टः समीचीनकृषिकर्मणा कृष्टः धन्वा मरुभूमिर्येन स तादृशः । मायावी मायावान् स प्रसिद्धः रावणः पुनरपि मद्गृहे मद्भवने प्राप्तोऽसि । किं वितर्के । रावणपक्षे —सीतायां वैदेह्यां दृढं प्रसितः अत्यन्तमासक्तः, कृतयुगे युगान्तरे व्यापारेण घोरः क्रमः परिपाटी यस्य स तादृशः । कृतयुगे हि रावणः स्वशिरःकर्तनादिघोरतपश्चर्यां कृत्वा श्रीपरमेश्वरात् त्रैलोक्याधिपत्यं संपादयामासेति श्रीमद्रामायणादिप्रसिद्धिरनुसंधेया । दर्पेण बलेन उज्जृम्भितो यः हैहयाधिपः कार्तवीर्यार्जुनः तेन हत्या हननेन श्रान्तिं श्रमं वहसि । कार्तवीर्यार्जुनो युद्धे रावणं निर्जित्य कारागृहे निरुद्धवानिति पौराणी कथा । अनरण्यस्य इक्ष्वाकुवंशस्य राज्ञो विषये गोचरे प्रख्यातः प्रसिद्धः, तं निर्जितवानित्यर्थः । उत्कृष्टधन्वा आकृष्टधन्वा ॥ ८८ ॥

ताम्रश्मश्रुमुखोऽसि नैव सहसे क्रोडाहतिं मानवैः
कामं वाडववैरमाकलयसे रोषेण नैसर्गिकम् ।
संप्रीतिं तरसादनेऽपि तनुषे त्वामद्य पानोत्सुकं
चन्दाखानमवैमि यत्तव खुरानाश्चर्यमालोकये ॥ ८९ ॥

ताम्रेति । ताम्रश्मश्रुमुखोऽसि ताम्रवर्णोपेतमुखरोमविशिष्टः, मानवैः मनुष्यैः क्रोडस्य भुजान्तरस्य आहतिं हननम् ; 'ना क्रोडं भुजान्तरम्' इत्यमरः । नैव सहसे । काममत्यन्तं रोषेण कोपेन नैसर्गिकं स्वाभाविकं वाडववैरमश्ववैरमाकलयसे । तरसा वेगेन अदने भक्षणे संप्रीतिं संतोषं वितनुषे तनोषि । पानोत्सुकं त्वां अद्येदानीं चन्दाखानं चन्दाखाननामानं म्लेच्छप्रभुमवैमि जानामि । यद्यस्मात्कारणात् तव खुरान् शफानि ; 'शफं क्लीबे खुरः पुमान्' इत्यमरः । आलोकये इत्याश्चर्यम् । यवनपक्षे —ताम्रस्तुरुष्कः श्मश्रुमुखः श्मश्रुमान् मानवैः क्रोडस्य वराहस्य आहतिं हननम् ; 'क्रोडः पोत्री किरिः किटिः' इत्यमरः । वाडवानां ब्राह्मणानां वैरं द्वेषम्, तरसस्य मांसस्यादने भक्षणे ; 'पिशितं तरसं मांसम्' इत्यमरः । मद्यपानोत्सुकं मदिरापानोत्सुकम् । खुरानिति म्लेच्छशास्त्रस्य संज्ञा ; तदपि महिषस्य श्लेषबलेन प्रतीयत इत्याश्चर्यं बोध्यम् ॥ ८९ ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्वंद्वे प्रीतियुतः क्वचित्कृतबहुव्रीहिप्रकर्षः क्वचि-
त्पश्चात्तत्पुरुषान्वितः कृतसमाहारः क्वचिच्च क्वचित् ।
शब्देषु द्विगुणादरं कलयसि श्रीकासरक्ष्मापते
प्रायः शाब्दिकचक्रवर्तिनमिह त्वामेव मन्यामहे ॥ ९० ॥

द्वंद्व इति । द्वंद्वे मिथुने प्रीतियुतः ; 'स्त्रीपुंसौ मिथुनं द्वंद्वम्' इत्यमरः । क्वचित्प्रदेशविशेषे निर्व्यापारस्थल इत्यर्थः । क्वचिदन्यत्र कृतः बहुव्रीहिप्रकर्षः, बहवः अनेके व्रीहयः शालयस्तेषां प्रकर्षः येन सः तथाविधः । पश्चादनन्तरं तत्पुरुषेण कर्षकेणान्वितः । क्वचित्कुत्रचित् कृतः समीचीन आहारो भक्षणं येन स तादृशः । क्वचिच्च प्रदेशे शब्देषु ध्वनिषु द्विगुणस्य द्विगुणशब्दस्यादरं करोषि । श्रीकासरक्ष्मापते प्रायः प्रायेण शाब्दिकचक्रवर्तिनं वैयाकरणश्रेष्ठं त्वां मन्यामह एव । वैयाकरणपक्षे—द्वंद्वे इतरेतरद्वंद्वे प्रीतियुतः, समस्यमानपदार्थातिरिक्तपदार्थप्रतीत्यभावात् । क्वचित्कृतः सिद्धान्तितः बहुव्रीहिः 'अनेकमन्यपदार्थे' इति सूत्रविहितसमासस्य प्रकर्षः तत्पुरुषापेक्षया प्राबल्यं इन्द्रपीताधिकरणन्यायसिद्धं येन स तादृशः । पश्चादनन्तरं तत्पुरुषेण तत्पुरुषसमासेनान्वितः, तत्पुरुषे पूर्वपदे संबन्धिलक्षणाङ्गीकाराद्बहुव्रीह्यपेक्षया तद्दौर्बल्याभिप्रायेण पश्चाच्छब्दप्रयोगः । न च बहुव्रीहावप्यन्यपदार्थप्रतीत्यर्थं लक्षणाऽऽवश्यकीति वाच्यम् । बहुव्रीहेरन्यपदार्थे शक्तेरवारुणाधिकरणादौ व्युत्पादितत्वात् । क्वचित्कृतः समाहारः समाहारद्वंद्वो येन स तथोक्तः । द्विगुना द्विगुसमासेनादरं प्रीतिं कलयसीति प्राञ्चः । अन्ये तु द्विर्द्विरत्वं, गुणः 'अदेङ्गुणः' इति शास्त्रविहितसंज्ञावाचकावादिः तयोरादरं कलयसीत्यर्थः । एतेन पूर्वव्याख्यायां द्विगुणेति णत्वानुपपत्तिः, 'रषाभ्यां नो णः समानपदे' इति शास्त्रबोधितनिमित्ताभावादिति निरस्तमित्याहुः । परे तु द्विगुर्द्विगुसमासः णत्वं च तयोरादरमित्याहुः । वयं तु ब्रूमः—द्वयोर्गुणः द्विगुणः, द्वयोरिति 'षष्ठी स्थानेयोगा' इति शास्त्रपरिभाषितस्थानषष्ठी । तथा च द्वयोः स्थाने गुणविधिं हि वैयाकरणो ब्रूते, 'एकः पूर्वपरयोः' इत्यधिकृत्य विहितत्वादिति संक्षेपः ॥ ९० ॥

त्वं शक्तिं सहजां दधासि च पदेष्वङ्गाजहल्लक्षणः
स्वातन्त्र्यं प्रथयंश्च शब्दविषयेऽप्यासक्तिगुर्व्यां भजन् ।
भूयो दर्शनतोऽपि लिङ्गकरणप्रामाण्यसंभावितः
कक्ष्यायां प्रसितस्ततोऽद्य महिष त्वां तर्कये तार्किकम् ॥ ९१ ॥

त्वामिति । सहजां सहोत्पन्नां शक्तिं दधासि । हे अङ्ग महिष पदेषु चरणेषु अजहत् अत्यजत् लक्षणमावर्तादिरूपं यस्य स तादृशः । शब्दविषये ध्वनिविषये स्वातन्त्र्यमन्यानपेक्षत्वं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रथयन् विस्तारयन् ; जनसमुदायेऽपि निर्भयं यथा तथा उच्चैः शब्दं करोषीत्यर्थः । उर्व्यां भूमावासक्तिमवस्थानं भजन् भूयः पुनः पुनः दर्शनं दृष्टिपथम् , एषि प्राप्नोषि । लिङ्गमेव लिङ्गकमुपस्थं तेन यद्रणं युद्धम्; निधुवनमित्यर्थः । अत्र प्रामाण्येन प्रमाणत्वेन संभावितः पूजितः, महिषीभिरिति शेषः । कक्ष्यायां वन्धिन्यां रज्जौ प्रसितः बद्धः । तयो हेतोः हे महिष त्वां तार्किकं तर्कशास्त्रज्ञं तर्कये मन्ये । तार्किकपक्षे—सङ्गतां शक्तिं कार्यानुकूलामभिनि यावत् । दर्शयति निरूपयति । पदेषु 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ काकादिपदेषु अजहती शक्यार्थमत्यजन्ती लक्षणा यस्य स तादृशः । शब्दविषये शब्दप्रमाणविषये स्वातन्त्र्यं स्वातन्त्र्येण प्रामाण्यं प्रथयन्विस्तारयन्, वैशेषिका हि शब्दस्यानुमानविधयैव प्रामाण्यं वदन्ति ; तन्निराकृत्य शब्दस्वातन्त्र्यवादं प्रवर्तयतीत्यर्थः । उर्व्यामासक्तिं भूमंतावन्तेच्छाम् ; यद्वा तर्कशास्त्रस्येश्वरसाधनैकप्रयोजनत्वेन तस्य च क्षितिः कर्तृजन्येत्यनुमानमूलकत्वेन तत्रासक्तेरावश्यकत्वादिति भावः । भूयोदर्शनं भूयःसु अधिकरणेषु दर्शनं साध्यहेत्वोः सहचारदर्शनम् , तस्य व्याप्तिग्राहकत्वादिति भावः । लिङ्गं धूमादि, करणं चक्षुरादि, प्रामाण्यं प्रामाण्यग्राहकत्वादि तैः संभावितः पूजितः, कक्ष्यायां वादकथायां प्रसितः बद्धः , समयबन्धादिनेति भावः ॥ ९१ ॥

सूत्राणि प्रसभं महाप्रतिभयोत्साहेन यत्खण्डय-
न्धाट्यावाङ्मुख एव चाधिकरणप्रौढिं परां दर्शयन् ।
संघर्षे सति वाडवैर्विजयितां सिद्धान्ततो गाहसे
तेन त्वं महिषक्षितीश्वर महामीमांसकाग्रेसरः ॥ ९२ ॥

सूत्राणीति । यद्यस्मात्कारणात् सूत्राणि स्वबन्धनसाधनानि, प्रसभं हठात्कारेण, महान् अधिकः, अप्रतिभयः प्रतिभयरहितः य उत्साहः संतोषः तेन, खण्डयन् शकलयन् , धाट्या वेगेन अवाङ्मुख एव परां श्रेष्ठाम् , अधिकस्य रणस्य युद्धस्य प्रौढिमुत्कर्षं दर्शयन् प्रकाशयन् , वाडवैरश्वैः संघर्षे युद्धे सति सिद्धो निश्चितो योऽन्तो नाशः तेन विजयितां जयिष्णुत्वं गाहसे । युद्धसमये अश्वं हत्वा जयं प्राप्नोषीत्यर्थः । तेन कारणेन हे महिषक्षितीश्वर त्वं महामीमांसकाग्रेसरः मीमांसकश्रेष्ठः भवसीति शेषः । मीमांसकपक्षे—सूत्राणि 'औदुम्बरी सर्वा वेष्टयितव्या' इत्यादीनि कल्पसूत्राणि, महाप्रतिभया महास्फूर्त्या उत्साहेन च खण्डयन् प्रत्यक्षश्रुतिविरोधेन न प्रमाणमिति स्थापयन् , धाट्या शब्दोच्चारणवेगेन वाङ्मुख एव अधिकरणप्रौढिमधिकरणविचारमाहात्म्यम् , न तु पुस्तकाद्यपेक्षयेति भावः । वाडवैर्ब्राह्मणैः संघर्षे वादे सति सिद्धान्ततः सिद्धान्तमार्गेण विजयितां प्राप्नोषि ॥ ९२ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मालिन्यास्पदमुच्चकैस्तव वपुर्ग्रीवा पुनः स्रग्धरा
नित्यं जाङ्गलभूमिषु त्वमयसे शार्दूलविक्रीडितम् ।
काठिन्यं वपुषो बिभर्षि नियतं किं चेन्द्रवज्राधिकं
वृत्तात्मा भजसि प्रबन्धपदवीं श्रीसैरिभक्ष्मापते ॥ ९३ ॥

मालिन्यास्पदमिति । उच्चकैरुन्नतं तव वपुः, मालिन्यस्य कर्दमादिप्रयुक्तमालिन्यस्य आस्पदं स्थानम् , ग्रीवा पुनः स्रग्धरा स्रजं रज्जुशङ्खकाकिणीकांस्यशृङ्खलादिकं धरतीति तादृशी । नित्यं जाङ्गलभूमिषु कठिनभूमिषु शार्दूलस्य व्याघ्रस्य विक्रीडितं चेष्टितं त्वमयसे प्राप्नोषि । कठिनभूकर्षणेऽपि शार्दूलसमानविक्रम इत्यर्थः । इन्द्रस्य शक्रस्य वज्रायुधं तदपेक्षया अधिकं काठिन्यं दृढत्वं, वपुषो देहस्य बिभर्षि । वृत्तात्मा वर्तुलात्मा प्रबन्धपदवीं प्रबन्धसाम्यं भजसि प्राप्नोषि । प्रबन्धपक्षे—मालिनीशार्दूलविक्रीडितेन्द्रवज्रादीनि वृत्तानि बोध्यानि । प्रबन्धस्य नानावृत्तशोभितत्वादिति भावः । तल्लक्षणानि तु विस्तरभयान्न लिख्यन्ते ॥ ९३ ॥

शृङ्गारं रुचिरं दधास्यनुदिनं वीरेण संचार्यसे
कृष्यां भूरि दयान्वितः प्रतिभयं हास्यं वहस्यद्भुतम् ।
उद्घोषं विकृतं करोषि बहुधा रौद्रं मुहुर्वीक्षसे
सायं दामनि शान्तिभाङ्नवरसास्तस्माल्लुलाय त्वयि ॥ ९४ ॥

शृङ्गारमिति । रुचिरं सुन्दरम् , शृङ्गयोर्विषाणयोरग्रं दधासि धत्से । अनुदिनं प्रतिदिनं वीरेण वीरनाम्ना गोपालेन संचार्यसे । कृष्यां कर्षणे भूरि अत्यन्तं दयया कृपयाऽन्वितो युक्तः प्रतिभयं भयंकरं, अद्भुतमाश्चर्यप्रदं हास्यं वहसि दधासि । विकृतं विकटमुद्घोषं ध्वनिं करोषि । बहुधा बहुप्रकारेण रौद्रं क्रूरं मुहुः पुनः पुनः वीक्षसे पश्यसि । सायं सायंकाले दामनि रज्जौ शान्तिभाक् निर्व्यापारः, तस्मात्कारणात् त्वयि नवरसाः शृङ्गारादयः दृश्यन्त इति शेषः । शृङ्गारादिशब्दैः शृङ्गारादयोऽलंकारशास्त्रे प्रसिद्धा नवरसा बोध्याः । तल्लक्षणानि च पूर्वमेवोक्तानि ॥ ९४ ॥

त्वं सद्यस्तनपीडनेन रचयञ्शृङ्गारलीलाश्रुता-
न्यापीतैरधरामृतैश्च सरसः संमीलिताक्षः सुखैः ।
आकृष्टः प्रसभं सरोमलतया तापाच्चिरेणातनोः
पद्मिन्या रसिकाग्रणीरिव लुलायाधीश संक्रीडसे ॥ ९५ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्वमिति । सद्यस्तनं तात्कालिकं यत्पीडनं ताडनं तेन शृङ्गयोर्विषाणयोः अग्राभ्यामग्राभ्यां लीलया अनायासेन क्षतानि व्रणानि रचयन्कुर्वन्ना समन्तात्पीतैः पानकर्मीकृतैः सरसः कासारस्याधरामृतैरन्तर्वर्तिजलैः सुखैरानन्दैश्च संमीलिते मुकुलिते अक्षिणी यस्य सः तथोक्तः । उपरितनजलस्य रविकिरणतप्ततया तत्परित्यज्याधोभागगतशीतलजलपानेन संतोषं प्राप्नोषीत्यर्थः । सरसः सरस्या अमलतया स्वच्छतया अतनोः महतः तापात्सूर्यकिरणदाहात्प्रसभं बलात्कारेण आकृष्टो नीतः, अर्थात्सरोदेशं प्रतीति ज्ञेयम् । हे लुलायाधीश त्वं पद्मिन्या सरस्या सह रसिकाग्रणीरिव रसिकश्रेष्ठ इव संक्रीडसे रमसे । रसिकापक्षे—स्तनयोः कुचयोः पीडनेन मर्दनेन शृङ्गारस्य शृङ्गाररसस्य या लीला विलासः तया क्षतानि नखदन्तक्षतदंशनादिजनितव्रणानि, सद्यस्तस्मिन्नेव क्षणे आ समन्तात्पीतैः अधरस्य दशनच्छदस्यामृतै रसैः सरसः शृङ्गाररसास्वादविशिष्टैः सुखैर्विगलितवेद्यान्तरस्वस्वरूपानन्दानुभवैः ; 'रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतेरिति भावः । सरोमलतया रोमराजिसहितया अतनोः अनङ्गस्य तापाज्ज्वरात्, अर्थात्तरुण्येति संबध्यते । प्रसभमाकृष्टः वशीकृतः पद्मिन्या उत्तमनायिकया । अत्र वात्स्यायनतन्त्रविदो नखदानविधानप्रकरणे (अनङ्गरङ्गे) —'ग्रीवाकरोरुजघनस्तनपृष्ठकक्षाहृत्पार्श्वगण्डविषये नखराः खराः स्युः । माने नवीनसुरते विरहे प्रवासे द्रव्यक्षयेऽथ विरतौ च मदे प्रयोज्याः ॥' तथा —'अव्यक्तरेखं कृतरोमहर्षं समर्पितं गण्डकुचाधरेषु । यत्कर्म संपूर्णनखप्रसूतं विज्ञास्तदेतच्छुरितं वदन्ति ॥' तथा दन्तक्षतप्रकरणेऽपि—'नखप्रदेशेषु रदाः प्रयोज्याः ओष्ठाननान्तर्नयनानि हित्वा । द्विवारसीत्कारविशेष उक्तो दन्तार्पणे कामकलाविदग्धैः ॥' एवं चुम्बनप्रकरणेऽपि—'अधराक्षिकपोलमस्तकं वदनान्तः स्तनयुग्मकंधरे । विहितानि पदानि पण्डितैः परिरम्भादनु चुम्बनस्य हि ॥' इति । तथा काव्यप्रकाशेऽपि चुम्बनपरिरम्भणादीनां रसाविर्भावनिमित्तत्वमुक्तम् —'संभोगो विप्रलम्भश्च द्विधा शृङ्गार इष्यते । संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः ॥ तत्राद्यः परस्परावलोकनपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इति एक एव गण्यते' इति । रसात्मकानन्दानुभवो युक्तः । तत्रैव 'ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृङ्गारादिको रसः' इति । अतनोस्तापादित्यनेन त्रयस्त्रिंशद्व्यभिचारिभावाः सूचिताः, 'मतिर्व्याधिस्तथोन्मादः' इत्यादिना परिगणितमध्यपातित्वात्तापस्य । त्रयस्त्रिंशत्स्वरूपं त्वस्मत्कृतश्लेषार्थचन्द्रिकायां द्रष्टव्यम् । पद्मिन्येत्यत्रापि पद्मिन्यादिलक्षणं वात्स्यायनतन्त्रे—'पद्मिनी चित्रिणी चाथ शङ्खिनी हस्तिनी तथा । क्रमाच्चतुर्धा नारीणां लक्षणानि ब्रुवेऽधुना । पूर्वं पूर्वतरास्तासु श्रेष्ठास्तल्लक्ष्म चक्ष्महे ॥ प्रान्तारक्तकुरङ्गशावनयना पूर्णेन्दुतुल्यानना पीनोत्तुङ्गकुचा शिरीषमृदुला स्वल्पाशना दक्षिणा । फुल्लाम्भोजसुगन्धिकामसलिला लज्जावती मानिनी श्यामा काऽपि सुवर्णचम्पकनिभा देवादिपूजारता ॥ उन्निद्राम्बुजकोशतुल्यमदनच्छत्रा मरालस्वना तन्वी हंसवधूगतिः सुललितं वेषं सदा बिभ्रती । मध्यं चापि

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

वलित्वमाङ्कितमसौ शुक्लाम्बराकाङ्क्षिणी सुग्रीवा शुभनासिकेति गदिता नार्युत्तमा पद्मिनी ॥ इति ॥ ९५ ॥

आशां पुष्यसि योनिपानसलिले यो नाभिमानान्वितः
प्रीत्या नित्यमपारलौकिकविधावङ्गीकृतः कैरपि ।
स्वच्छन्दं चरसीह यः किल परक्षेत्रे खलाग्रेसर-
स्तं त्वां हन्त विटाग्रगण्यमधुना जाने महासैरिभ ॥ ९६ ॥

आशामिति । यः निपानसलिले आहावजले, आशामिच्छां पुष्यसि रक्षसि । 'आहावस्तु निपानं स्यात्' इत्यमरः । नाभिमानेन नाभिप्रमाणेनान्वितो युक्तः ; नाभिदघ्न इत्यर्थः । नित्यं सर्वदा प्रीत्या संतोषेण अपारः निरवधिर्यो लौकिकस्य कृष्यादेर्विधिर्विधानं व्यापारः तस्मिन् कैरपि कैश्चिदेवाङ्गीकृतः स्वीकृतः ; न हि सर्वेऽपि महिषेणैव कर्षन्ति, वृषभेणापि कर्षणसंभवादिति भावः । परेषामन्येषां क्षेत्रे केदारे स्वच्छन्दं स्वेच्छं यथा तथा चरसि भक्षयसि । खलस्य धान्यराशीकरणस्थलस्य अग्रेसरः प्रमुखः, तं तादृशं त्वां हे महासैरिभ विटाग्रगण्यं जाने मन्ये । विटपक्षे — योनौ उपस्थे यत्पानं पेयं सलिलं तत्राशाम् ; पद्मिन्याः सुगन्धिमदनसलिलत्वेन भगचुम्बनमिच्छतीत्यर्थः । तदुक्तं वात्स्यायनतन्त्रे— 'कक्षायुगं मन्मथमन्दिरं च नाभेश्च मूलं स्मरलोलचित्ताः । चुम्बन्ति लाटा निजदेशसाम्यान्नास्त्यन्यतश्चुम्बनरीतिरेषा ॥' इति । अभिमानेन गर्वेण आभिजात्यादिजनितेनेति भावः । मान्वितः न युक्तः । विटस्याभिजात्यादेरपालनीयत्वादिति भावः । पारलौकिकं परलोकसाधनं ज्योतिष्टोमादिकं कर्म तन्न भवतीत्यपारलौकिकं परस्त्रीसंभोगादि तस्य विधौ व्यापारे कैरपि कैश्चिदेवाङ्गीकृतः । परक्षेत्रे परकलत्रे चरसि, खलानां दुष्टानाम् । परस्त्रीसंभोगो वात्स्यायनतन्त्रेऽभिहितः—'नारी चोत्तमयौवनाभिलषितं कान्तं न चेत्प्राप्नुयादुन्मादं मरणं च विन्दति तदा कंदर्पसंमोहिता । संचिन्त्येति समागतां परवधूं रत्यर्थिनीं स्वेच्छया गच्छेत्क्वापि न सर्वदा सुमतिमानित्याह वात्स्यायनः ॥' इति ॥ तथा च परस्त्रीसंभोगस्य वात्स्यायनसंमतत्वेऽपि सर्वश्रुतिस्मृतिनिषिद्धत्वेन तत्र प्रवर्तमानानां खलत्वं स्पष्टमिति भावः ॥ ९६ ॥

त्वं वाली रमसे रुमामुपगतः प्रौढाङ्गदेहान्वित-
स्तारामैत्रमिह स्फुटं वितनुषे नादैर्जयन्दुन्दुभिम् ।
इत्थं सत्यपि कामरेश्वर नृणामाश्चर्यदस्त्वयं या
मातङ्गान्तिक एव निर्भयमहो संचारशीलोऽसि किम् ॥ ९७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust